सापशब्दानां पूर्वशास्त्राणां सङ्ग्रहस्स तादृश एव । यथा मृदुपादाना घटी मृदेवेत्यत्राह—उत्तमैः प्रसादमाधुर्यादिगुणयुक्तैः प्रसिद्धैर्वा अदोषैः असाधुत्वाऽनर्थक्यादिदोषरहितैः अक्लिष्टैर्वा पदैः कृतपदगुम्भनम् विचित्रवृत्तं विविधानि विचित्राणि वृत्तानि श्रवणमनोहराणि मात्रासमार्धसमपादादीनि यत्र तत्तथा । नानाविधरमणीयवृत्तमित्यर्थः । लघु ग्रन्थतोऽल्पं तथाऽपि [1]प्रकाशिताभिधेय साकल्याभिधेयतया निर्दोषतया गुणवत्तया च विदुषां सम्मतं सम्यगभिमतं इदं मुहूर्तदर्शनमिति सम्बन्धः । अनेन सत्सम्मतत्वेनास्य गुणाधिक्यमुक्तम् । यथाऽऽह कालिदासः—

"तं सन्तश्श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।

हेम्नस्संलक्ष्यते ह्यग्नौ विशुद्धिश्श्यामिकाऽपि वा ॥" इति ।

नन्वत्राधिकारिसम्बन्धाभिधेयप्रयोजनानि वक्तव्यानि तान्यप्यत्रोक्तान्येव यथा—ज्योतिर्ज्ञानकामोऽधिकारी । स च लोकोपकारायेत्यत्र लोकशब्देनोक्तः । वेदेन सहाङ्गाङ्गिभावः सम्बन्धः, स च प्रागुक्तः। शुभाक्रियाकालनिरूपणमभिधेयं, तच्च मुहूर्तदर्शनमित्यनेनोक्तम् । जगतां शुभज्ञानं विदुषां पुमर्थचतुष्टयावाप्तिश्च प्रयोजनम् । तच्च-लोकोपकाराय च कीर्तये चेत्यनेनोक्तम् । उक्तं च नारदेन—

"अस्य शास्त्रस्य सम्बन्धं वेदाङ्गमिति कीर्तितम् ।

अभिधेयं च जगतश्शुभाऽशुभनिरूपणम् ॥

---

[1] प्रकाशिताभिधेयसाकल्यतया.

यज्ञाध्ययनसङ्क्रान्तिश्चेह षोडशकर्मणाम् ।
प्रयोजनं च विज्ञेयं तत्तत्कालविनिर्णयः ॥
विनैतदखिलं प्रोक्तं स्मार्तं कर्म न सिद्ध्यति ।
तस्माज्जगद्धितार्थाय ब्रह्मणा निर्मितं पुरा ॥" इति ।

ननु चात्रादौ जगणप्रयोगः कथं "जस्सूर्यो रुजमातनोति" इति स्मरणात् । उच्यते—जगणस्य सूर्यदैवताकत्वादस्य शास्त्रस्य तद्वाराऽभिधायित्वात् साधुरिति ।

अभिधेयं प्रतिज्ञाय सङ्केतप्रचुरस्यास्य शास्त्रस्यार्थावगति-स्तत्तत्सङ्केतावगमादृते न स्यादिति संज्ञां वक्तुमुपक्रमते—

क्रमेण राशिग्रहतारकादेस्संज्ञां वयं तावदिहा-भिदध्मः । शास्त्रार्थबोधः खलु तस्य तस्य संज्ञा-मविज्ञाय जनस्य न स्यात् ॥ ५ ॥

इह शास्त्रे वयं तावत् आदौ क्रमेण राशिग्रहतारकादेः राशयो मेषाद्या लग्नादिभावाश्च, ग्रहाः सूर्याद्याः, तारका आश्वि-न्याद्याः, आदिशब्देन तिथिवारयोगकरणानि गृह्यन्ते । राशि-भावग्रहनक्षत्रतिथिवारयोगकरणानां संज्ञां अभिदध्मः ब्रूमः । "आत्मनि गुरुषु बहुवचनं" इति आत्मैकत्वेऽपि बहुवचन प्रयोगः । किमर्थं संज्ञाभिधानमित्यत आह—शास्त्रार्थबोधः शास्त्रा र्थानां राश्यादीनां बोधः शास्त्राभिधेयराश्याद्यवगतिः श्रोतुः जनस्य तस्य तस्य राश्यादेस्संज्ञां सङ्केतनाम अविज्ञाय न स्यात् खलु यस्मात् तस्मात् शास्त्रार्थावगमाय संज्ञाऽभिधीयत इत्यर्थः । अथवा गुरूपदेशादृते जनस्य काव्यादिवत् स्वधियाऽधीयानस्य

तत्संज्ञामविदित्वा एतच्छास्त्रार्थबोधो न भवतीति ज्योतिशास्त्रस्य
ाचार्योपदेशगम्यतां प्रतिपादयितुं संज्ञा अभिधीयत इत्यर्थः ।

अथ राशीनां संज्ञामाह—

**अजाख्यमाद्यं प्रवदन्ति मेषं राशिर्वृषो गो-
वृषभाभिधानः । वीणायमाख्यं मिथुनं नृयुग्मं
स्यात्कर्कटः कर्कटकश्च कर्की ॥ ६ ॥ सिंहं च
कन्यां च निजाऽभिधानैः प्राहुस्तुलां तौलिवणिकप-
दाभ्याम् । कीटालिसंज्ञामथ वृश्चिकस्य धनुर्हयाङ्गं
च धनुर्धरं च ॥ ७ ॥ मृगश्च नक्रो मकरो मृगास्यो
द्वौ कुम्भमीनौ निजनामवाच्यौ । पर्यायनामानि
वदन्ति चैषां कथ्यन्त एते प्रथमादिशब्दैः ॥ ८ ॥**

आद्यं द्वादशराश्यात्मके क्षेत्रे प्रथमं राशिं द्वादशभागं
अजाख्यं अजस्य छागस्याख्यैवाख्या यस्य तं अजाभिधानवा-
च्यमित्यर्थः । मेषं च मेषाख्यं च वदन्ति । केचिदेवं योजयन्ति
मेषं राशिमाद्यं अजाख्यं च वदन्ति । मेषस्याद्यसंज्ञानं वृषादीनां
द्वितीयादिसंज्ञानस्योपलक्षणमिति । तदसत् । यतो वक्ष्यति 'कथ्यन्त
एते प्रथमादिशब्दैः' इति । तेन पौनरुक्त्यं प्रसज्येत । तस्मात् प्रा-
क्तनमेव व्याख्यानं साध्विति । वृषो द्वितीयो राशिः गोवृषभाभि-
धानः गौश्च वृषभश्च गोवृषभौ तयोरभिधानमस्येति । यद्वा—
गोवषभशब्दावभिधाने वाचकावस्येति बहुव्रीहिः, गोवृषभशब्दवाच्य

इत्यर्थः । एवं सर्वत्र विग्रहो द्रष्टव्यः । मिथुनं तृतीयो राशिः नृयुग्मसंज्ञः । वीणाशब्देन यमशब्देन च वाच्यः । यमौ यमलौ तन्नाम्यः । कर्कटकश्चतुर्थो राशिः कर्कटः कर्की च स्यात् । सिंहं च पञ्चमराशिं कन्यां षष्ठराशिं च निजाभिधानैराहुः सिंहं सिंह नामभिः कन्यां कन्यानामभिरित्यर्थः चशब्दस्स्त्रीपर्यायमात्रस्यापि ग्रहणार्थः । तुलां सप्तमराशिं तौलिशब्देन वणिक्पदशब्देन च कथयन्ति तौलिस्तुला वणिक्पदमापणम् । अपिच तौलिशब्देन वणिक्छब्देन च वदन्ति । वृश्चिकस्याष्टमराशेः कीटालिसंज्ञां कीटश्च अलिश्च कीटाली तत्संज्ञां कीटसंज्ञामालिसंज्ञां चाथ कात्स्न्र्येनाहुः । यद्यपि शास्त्रान्तरे कर्कटकस्यापि कीटसंज्ञाऽस्ति तथाऽपि वृश्चिकस्य कृत्स्नशास्त्रेष्वपि साऽस्तीति कात्स्न्र्यार्थमथशब्दः । धनुः नवमराशिं हयाङ्गं चशब्दात् हयं च धनुर्धरं चशब्दादश्वा-रोहं च प्राहुः । मकरो दशमराशिः मृगः नक्रः मृगास्यः इति नामभिर्वाच्यः । कुम्भमीनौ द्वौ एकादशद्वादशौ राशी नि· जनामभिः वाच्यौ स्तः । एकादशराशिः कुम्भनामभिर्वाच्यः, द्वा दशराशिः मीननामभिर्वाच्यः । मेषादीनां यद्येतावन्त्येव नामानि कथं तर्हि चापहरिणाननादीनां ग्रहणमित्यत्राह—पर्यायनामानि वदन्ति चैषां इति । मेषादिराशिवाचकानामजादिशब्दानां स्वस्व पर्यायपठितानि च नामानि संज्ञात्वेन वदन्ति । यथा अजः छागो बस्तः । वृषः पुङ्गवः ककुद्मान् । मिथुनं वीणा वल्लकी । सिंहो मृगेन्द्रः केसरी । कन्या कुमारी स्त्री योषिद्युवतिः । तुला घटः । वृश्चिकः आलिः भृङ्गः । धनुश्चापः हयस्तुरगः धनुर्धरो धन्वी । मकरो मृगो हरिणः नक्रश्शिशुमारः मृगास्यो हरिणा-ननः । कुम्भः पयोधरो घटः । मीनो झषश्शफर इत्यादीनि ।

तथैव एते मेषाद्याः प्रथमादिभिः प्रथमद्वितीयादिद्वादशपर्यन्तैश्शब्दैः कथ्यन्ते। यथा मेषः प्रथमः, वृषो द्वितीयः, मिथुनं तृतीयं, इत्यादि।

राशीनां संज्ञान्तरमाह—

संज्ञाभिः क्रियलेयजूकजतुमाः [1] कोर्पिः कुळीरस्तथा हृद्रोगेत्थसितौक्षिकाश्च कथिताः पाथोनकस्ताबुरुः। आकोकेर इतीह मेषमृगपौ तौळिर्नृयुग्माळिनौ कर्की कुम्भझषौ धनुर्युवतिगोनक्राः क्रमाद्राशयः ॥ ९ ॥

इह शास्त्रे मेषाद्याः द्वादश राशयः पाठानुक्रमेण क्रिय इत्यादिसंज्ञाभिः कथिताः। यथा-मेषः क्रिय इति, मृगपः सिंहो लेयः, तौलिर्जूकः, नृयुग्मं जतुमः, अळिर्वृश्चिकः कोर्पिः, कर्की कर्कटकः कुळीरः, कुम्भो हृद्रोगः, झषः मीनः इत्थसिः, धनुः तौक्षिकः, युवतिः कन्या पाथोनकः, गौः वृषभः ताबुरुः, नक्रो मकरः आकोकेर इति संज्ञया कथिता इत्यर्थः ॥

राशीनां सामान्यसंज्ञामाह—

स्थानं क्षेत्रमिति द्वे गृहस्य पर्यायनाम निखिलमपि। राशीनां नाम स्याद्भमृक्षमिति राशितारयोरुभयोः ॥ १० ॥

स्थानं क्षेत्रमिति द्वे नामनी, गृहस्य निखिलं पर्यायनाम मन्दिरालयास्पदनिकेतनाद्यपि द्वादशानां राशीनामपि नाम सामान्याभिधानं स्यात्।

---

[1] कौर्पि.

तथा भमृक्षमिति द्वे राशिनक्षत्रयोर्द्वयोरप्यभिधेययोः स्तः । यथा भं राशिः भं नक्षत्रं, ऋक्षं राशिः ऋक्षं नक्षत्रमिति । नन्विह राशि सामान्यस्य गृहसंज्ञाऽभिहिता । उपरि चतुर्थभावस्य च वक्ष्यति । तत् गृहमित्युक्ते (कतरस्येह ग्रहणमिति) कथमध्यवसेयम्, उच्यते— यत्र स्वामिसंबन्धाभावसंयोगस्तत्र राशिसामान्यस्य, यथा भौमगृहं-षष्ठं गृहं सुतगृहमिति । यत्र तु स नास्ति तत्र चतुर्थस्थानस्य, यथा गृहे सूर्यो मानहेति ।

अथ भावशब्दवाच्यानां राशीनां संज्ञामाह—

होरात्मकल्यतनुमूर्त्यभिधं तु लग्नं स्थानं कुटु-
म्बधननाम परं तृतीयम् । दुश्चिक्यविक्रमसहोदर
संज्ञमन्यत्पातालबन्धुहिबुकाम्बुसुखालयाख्यम् ॥

धीपुत्त्रप्रतिभाभिधानमपरं षष्ठं क्षतार्याह्वयं
जामित्रास्तकळत्रमन्मथमदद्यूनाभिधं सप्तमम् ।
रन्ध्रायुर्मरणं पराभवमृतिस्थानं वदन्त्यष्टमम्,
गुर्वाख्यं नवमं बुधैरिह शुभं धर्मस्तपश्चोच्यते ॥

स्यादाज्ञास्पद[1]मान कर्मगगनव्यापारमेषूरणं प्र-
ख्यातं दशमं परं तु कथयन्त्यायं भवं चागमम् ।
स्थानं द्वादशमामनन्ति मुनयो रिष्फव्ययाख्या-

[1] कर्ममान.

न्वितं लग्नादिष्वभिधीयते च निखिलं पर्यायनामान्तरम् ॥ १३ ॥

लग्नं इष्टराश्युदयः । 'राशीनामुदयो लग्नम्' इत्यमरः । होरात्मकल्यतनुमूर्त्यभिधं होरा आत्मा कल्यं तनुर्मूर्तिरित्येता अभिधाः अभिधानानि यस्य तत्, प्राग्लग्नं होरादिपञ्चसंज्ञं भवतीत्यर्थः ।

ननु 'लग्नादिष्वभिधीयते च निखिलं पर्यायनामान्तरं' इति वक्ष्यति, किं पुनरिहैकार्थानामात्मतनुमूर्तिशब्दानां त्रयाणां ग्रहणमिति, एवं मन्यते—आत्मशब्दस्तावत् लग्नस्य शुभाशुभज्ञाननिमित्ततां सर्वभावोत्कृष्टतां च दर्शयितुं गृहीतः । तथा हि—आत्मशब्दस्सर्वकारणे परमात्मनि सर्वोत्कृष्टे जीवात्मनि च वर्तते । मूर्तिशब्दस्त्वेकाभिधेये पर्यायप्राचुर्येऽपि लोकप्रसिद्ध्यैव पर्यायनामान्तरं प्रयोक्तव्यमिति । तथा च वराहमिहिरः—'पर्यायमन्यदुपलभ्य वदेच्च लोकात्' इति । लग्नात्परं द्वितीयं स्थानं कुटुम्बधननाम कुटुम्बाख्यं धनाख्यं च स्यात् । तृतीयं स्थानं दुश्चिक्यादिसंज्ञात्रययुक्तं स्यात् । अन्यच्चतुर्थं स्थानं पातालादि सज्ञाषट्कयुक्तं स्यात् । अपरं पञ्चमं स्थानं धीपुत्रप्रतिभाभिधानं वदन्ति । षष्ठं स्थानं क्षतशत्रुद्विसंज्ञायुतम् । सप्तमं जामित्रादि संज्ञाषट्कयुक्तं स्यात्, अष्टमं स्थानं रन्ध्रादिचतुष्टयसंज्ञायुतं वदन्ति । रन्ध्रायुर्मरणमिति समाहारे द्वन्द्वैकवद्भावः । नवमं स्थानं ज्योतिश्शास्त्रविद्भिर्गुर्वादिसंज्ञाचतुष्टयान्वितमुच्यते । दशमं स्थानमाज्ञादिसंज्ञासप्तकयुतं स्यात्, यद्यपीहास्पदशब्देन[1] गृहपर्यायः, त-

[1] आस्पदशब्दो गृहपर्याय इति युक्तं स्यादिति भाति.

थाऽपि चतुर्थस्थानवाचकतया लोकप्रसिद्ध्यभावाद्दशमस्थानवाचकत्वमेव प्रसिद्धम्, न तु तत्पर्यायस्य। अत एवोक्तं प्रख्यातमिति। दशमं स्थानं आज्ञादिशब्दसंज्ञामात्रयुक्तं, न तु तत्पर्यायसंज्ञं प्रसिद्धं स्यात्। परं त्विति तु शब्दार्सिंहावलोकनन्यायेन परावृत्य प्राक् सम्बध्यते। तेनायं विशेषस्सिध्यति। यद्यप्याज्ञादीनां पर्यायनामग्रहणं नास्ति, तथाऽपि गगनमित्याकाशपर्यायो गृह्यते। परमेकादशं स्थानमायादिसंज्ञा(त्रया)न्वितं कथयन्ति। द्वादशं स्थानं रिष्फं व्यय इति द्वाभ्यामाख्याभ्यां युक्तमामनन्ति आहुः। एवमुक्ताः संज्ञाः पूर्वैरेवाभिहिताः न तु मया स्वधियैव कृता इति द्योतयितुमामनन्ति मुनय इत्युक्तम्। एवमभिहितेषु लग्नादिषु सर्वं पर्यायनामान्तरं तन्वादिपर्यायनामाभिधानमपि यथासम्भवमभिधीयते मुनिभिरिति शेषः। सति सम्भवे पर्यायनामापि स्यादित्यर्थः। तदर्थं चशब्दः। तथा हि—होराहिबुकदुश्चिक्यमेषूरणादीनां पर्याया न सन्ति। तत्र तावत् लग्नहोराकल्यानां पर्यायान्तरस्याप्रसिद्धिः। तनोस्तु 'अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कळेबरम्। गात्रं वपुस्संहननं शरीरं वर्ष्म विग्रहः। कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः'। इत्यमरः। आत्मा देह इति च। अत्र प्रतीकसंहननादीनां तनुपर्यायत्वेऽपि लोकप्रसिद्ध्यभावाद्वृत्तिर्नास्ति। एवमुत्तरत्रापि द्रष्टव्यम्। धनस्य पर्यायशब्दाः अर्थस्ववित्तवसुद्रव्यद्रविणादयः। सहोदरस्य भ्रातृसहजसहोत्थसोदरादयः। पातालस्य रसातलाद्याः। बन्धोः बान्धवसुहृन्मित्राद्याः। अम्बुनः तोयपयस्सलिलाम्भोवारिनीराद्याः। सुखस्य शर्मसौख्याद्याः। गृहस्य सद्मसदनमन्दिरालयवसतिनिकेतनाद्याः। धियः मतिबुद्ध्याद्याः। पुत्रस्य तनयतनुजापत्यात्मजसुताद्याः। शत्रोः सपत्नद्विषदरिवैरिद्वेषिप्रत्यर्थ्या-

द्याः । कळत्रस्य दारपत्नीप्रियाभार्याजायाद्याः, स्त्रीपर्यायाश्च । मन्मथस्य स्मरकाममारमदनमनसिजाद्याः । रन्ध्रस्य सुषिरविवरबिलाद्याः । मरणस्य मृतिमृत्युनिधनान्ताद्याः । गुरोः देशिकाचार्याद्याः । शुभस्य कल्याणमङ्गळाद्याः । धर्मस्य वृषसुकृताद्याः । गगनस्य खाभ्रद्युव्योमाम्बरनभोऽन्तरिक्षवियदाकाशाद्याः । आयस्य लाभागमाद्याः । व्ययस्य हान्याद्याः प्रसिद्धाः । होराहिबुकदुश्चिक्यजामित्रद्यूनमेषूरणरिफ्फशब्दानां पर्याया न सन्ति प्रायेणान्येषामप्रसिद्धा इतीह ग्रन्थविस्तरभीत्या नाभिहिताः । यदि क्वचिदन्येऽपि सन्ति ते तत्र तत्रैवाभिधास्यन्ते ।

अथ के पुनरेते भावा नाम, ये तनुधनसहजबन्धुसुतरिपुदाररन्ध्रशुभकर्मव्ययसंज्ञाः ज्योतिर्विद्भिः कल्पिता उच्यन्ते, भावयन्ति उत्पादयन्ति नृणां शुभाशुभानीति भावाः । यद्वा भावयन्ति निरूपयन्ति शुभाशुभानि एभिरिति भावाः राशयः । शुभाशुभज्ञानाय ज्योतिर्विद्भिः कल्पिताः तन्वादिसंज्ञिताः क्षेत्रविशेषाः । ते यावन्तं कालं पूर्वहरितमारभ्योद्गच्छन्ति स कालो लग्नादिसंज्ञितः । तदानयनाय स्वेष्टकालिकात् स्वायनांशसहितात् स्फुटार्कात् उदयलग्नं साधयेत् । यथोक्तं रल्लेन—

भोग्यात् सहस्रकिरणेन गृहस्य भोगान्
सन्ताडयेत् तदुदयेन हरेत्खरामैः ।
लब्धं त्यजेदसुसमूहमभीप्सितेभ्योऽ-
सुभ्यः क्षिपेद्दिनकरेऽपि च राश्यभुक्तम् ॥

यावन्त एवमुदया निपतन्त्यसुभ्यो
राशीन् क्षिपेत्तदनु तावत एव सूर्ये ।

शेषात्खरामगुणितादविशुद्धलब्ध
भागादिकाञ्च भवतीष्टविलग्नमेवम् ॥ इति ॥

दिने गतघटीभिरेवं लग्नं साधयेत् । रात्रावप्येवं राशिगतघटिका-भिर्लग्नं संसाध्य राशिषट्कं क्षिपेत् । तथा च रल्लः—

उद्गच्छतः परिमितिर्भवनस्य या स्या
दस्तं यतो जलपतेर्दिशि साऽस्तराशेः ।
कृत्वेष्टकालिकमिनं द्युगतेर्विधेयं
काले विलग्नमथ भाऽर्धयुतं रजन्याम् ॥ इति ।

एतदेव षड्राशियुतमस्तलग्नं स्यात् । तथाचोक्तमनेन—

चक्रार्धयुक्तमिदमस्तविलग्नमाहुः इति ।

अथ धनव्ययादिभावानां निरक्षोदयानीतमध्यलग्नपाताळलग्न प्रत्यासत्तिवशात्तुशङ्कागावच्छिन्नराशिक्षेत्रत ऊनाधिकभावसंम्भवात्ताव-न्मध्यलग्नानयनाय प्राङ्नतकालानीतं राश्यादिकमर्काद्विशोधयेत् । प्रत्यङ्नतकालानीतमर्के योजयेत् । मध्यलग्नं भवति । यथाऽऽह भास्करः—

[1] लग्नोदयानतावाप्तानवगम्य रवेरसून् ।
तिथिमध्यान्तरासुभ्यो हित्वा शोध्यं गतं ततः ।
शेषेऽपि यावतां सन्ति व्युत्क्रमात्तावतस्त्यजेत् ॥
भागान् लिप्ताश्च पूर्वाह्णे मध्यलग्नमुदाहृतम् ।
अपराह्णे च यः कार्यो गन्तव्यादेर्विवस्वतः ॥ इति ।

[2] एतदेव सषड्भं पाताळलग्नं भवति । तथाच श्रीधरः[3]—

सषड्भं मध्यलग्नं तु पाताळं प्रोच्यते बुधैः । इति ।

[1] लङ्कोदया । लङ्कोदयानुपाताप्तान् । [2] एतावदेव. [3] श्रीपतिः.

एवमानीतेषु चतुर्षु लग्नादिषु द्वयोर्द्वयोर्निरन्तरयोरन्तरं न्यस्य त्र्यंशं पृथगेकेन द्वाभ्यां च सङ्गुण्य लग्नादिषु द्विष्ठेषु निक्षिपेत् । तत्तत्समनन्तरभावा भवन्ति । एतेऽष्टौ लग्नादीनि चत्वारीति द्वादश भावा आनीयन्ते । एभिरेव द्वादशभिर्भावैस्सर्वैः शुभाशुभं निरूपणीयम् ।
तथाच श्रीपतिः—

लग्नं चतुर्थाद्धिबुकं कलत्राज्जामित्रभम्मध्यविलग्नतश्च ।
खमं विलग्नाच्च विशोध्य शेषं तत्त्रयंशमेकं द्विगुणं निदध्यात् ॥
लग्नाम्बुजामित्रनभोगृहेषु तदन्तरालोद्भवभावसिद्धयै ।
सिध्यन्ति भावा द्विगुणाष्षडेवं शुभाशुभं चिन्त्यमशेषमेभिः । इति

आनीता एते द्वादश भावमध्यास्स्युः । तदाद्यन्तावगमाय निरन्तरयोरुभयोर्योगयोर्भावं विधायाऽर्धितं यावद्राश्यादिके प्रदेशे तयोस्सन्धिः पूर्वस्यान्त उत्तरस्यादिश्च भवति तत्र स्थितो ग्रहः उभयभावानाश्रयणादफलः । भावसन्धेरूनो ग्रहः पूर्वभावगतमाधिकं उत्तरभावगतं फलं प्रयच्छति । तथाच जातकपद्धतौ—

वदन्ति भावैक्य[1]दलं हि सन्धिस्तत्र स्थितस्स्यादफलो ग्रहेन्द्रः ।
ऊनस्तु सन्धेर्गतभावजातमागामिजं चाभ्यधिकं करोति ॥

इति ॥ एवं भावकल्पनया ग्रहाणामेकराशिगतानामपि भावभेदात् फलभेदस्स्यात् । भिन्नराशिगतानामप्येकभावाश्रयणात् फलैक्यं स्यात् । तथा च नारदः—

लग्नस्य येंऽशाभ्युदिताः तत्सङ्ख्येषु स्थितो ग्रहः ।
[2]लग्नाद्भावफलं दत्ते तानतीतो द्वितीयजम् ।
फलं स्थानेषु शेषेषु चैवमेवं प्रकल्पयेत् । इति ।

[1] फलं.   [2] लग्नोद्भव.

(अत्र) भावारम्भादुपक्रम्य क्रमादुपचीयमानं फलं भावमध्ये पूर्णं स्यात् । तस्मात् क्रमेण क्षयिमाणं भावान्ते शून्यं भवतीति भावफलं भावमध्यसमे ग्रहे पूर्णं स्यात् । तदूने तदधिके च त्रैराशिकेन फलं प्रकल्पयेत् । तथा च श्रीपतिः—

भावप्रवृत्तौ हि फलप्रवृत्तिः पूर्णं फलं भावसमांशकेषु ।
ह्रासक्रमाद्भावविरामकाले फलस्य नाशः कथितो मुनीन्द्रैः ॥
भावांशतुल्यः खलु वर्तमानभावोद्भवं पूर्णफलं विधत्ते ।
भावोनके चाप्यधिके च खेटे त्रैराशिकेनात्र फलं प्रसाध्यम् ॥

इति । ननु यद्येवं भावफलं कल्प्यते आदौ पूर्णफलं स्यात् मध्ये मध्यफलकरं लग्नमवसाने अल्पफलं स्यादिति लग्ननिश्चयः कार्य इति रल्लेनोक्तमनेन विरुध्यते, न, यतो रल्लवचनं राशिविषयम् तथा हि—राशेः फलं प्रथमद्रेक्काणे पूर्णं, मध्ये मध्यमन्त्येऽल्पं च भवति । ननु राशिभावयोरभेदात् भावस्यापि राशिवत् फल कल्पना किं न स्यात्, एवं मन्यते, राशीनामेकैकग्रहाधिपत्यानियमात् सुकरः फलादेशः । भावानां तु तथाऽऽधिपत्यनियमाभावात् फलादेशो दुष्करस्स्यात् । तथाहि—कदाचिद्राशिद्वयव्यापिनो लग्नादेरेकैकस्य भावस्य तद्राशिद्वयस्याधिपती द्वावप्याधिपत्यमभिलषतः कदाचिदाद्यराश्यधिपतिरेव न तथेष्यते । भावमध्ये फलं संपूर्येत इत्यत्र तु यस्मिन् राशौ भावमध्यं स्यात् तद्राश्यधिपतिरेव भावाधिपतिरिति सुकरः फलादेशः । तस्मादिदमेव श्रेय इति एवमपि सुबोधकृतोक्तं विरुध्यत एव । तथाच [1] तद्वाक्यम्—

[1] कण्वाख्यः.

अशुभं च शुभं चोद्यन्नुदेष्यन्नुदितो ग्रहः ।
त्रिद्व्येकगुणमाधत्ते लग्नादिस्थानमाश्रितः ॥ इति ।

एतत् ग्रहविषयमस्य सम्मतमेव । तद्यथा—लग्नादिभावस्थितो ग्रहस्तद्भावमध्यमश्चेत् तद्भावोक्तं स्वफलं त्रिगुणं करोति, तद्भावमध्यादधिकश्चेत् तद्द्विगुणं, तद्भावमध्यादूनश्चेत् तदेकगुणं यथाप्राप्तमेव करोति । एवमनयोस्सम्मतिरेव । अत्रेयमुपपत्तिः—भावमध्यसमे ग्रहे लग्नग्रहयोरुभयोर्भावमध्यसंयोगात् फलस्य त्रैगुण्यं स्यादेव । तदूने तु लग्नभावफलस्य प्रवृत्तेर्ग्रहभावफलस्य ह्रासाच्च [1]तत्रैकमेव फलं । तथा तदधिके ग्रहभावफलस्य प्रवृत्तेः लग्नभावफलस्य ह्रासात् तत्राप्येकमेव । तच्च ग्रहस्यादृश्यार्धावस्थानाद्द्विगुणं स्यादिति । सर्वत्रैवमेव शुभाशुभफलं वदेत् । तच्च षड्विधं—ग्रहजं भावजं राशिजं ग्रहभावजं ग्रहराशिजं योगजं चेति । तत्र स्वातन्त्र्येण ग्रहैर्दीयमानं ग्रहजं, तथा भावैर्भावजं, राशिभीराशिजम् । तथा ग्रहैर्भावनिबन्धनं दीयमानं ग्रहभावजं, ग्रहैराशिनिबन्धनं दीयमानं ग्रहराशिजं, ग्रहैः राशिभावनिबन्धनं दीयमानं योगजमिति । तेषु राशिजमेव रत्नमतस्य विषयः । अन्यानि श्रीपतिमतस्य विषया इति । सर्वासु शुभक्रियास्वेवमेव भावाः प्रकल्पनीयाः । तथाच श्रीधरः—

यत्राविवाहादिषु शोभनेषु कार्येष्वथान्येषु च जन्मकाले ।
भावान्प्रकुर्याद्वचनादिदृष्टानुक्तान् मया शिष्यहितार्थमित्थम् ।

इति । एवं भावानयनमनादृत्य राश्याद्यन्तयोरिष्टकालयोरपि राशिमध्य एव भावमध्यत्वेन कल्पिते वैषम्यात् भावफलं न सम्भवेत् । यथाऽऽह श्रीपतिः—

जन्मप्रयाणव्रतबन्धचौळनृपाभिषेकादिकरग्रहेषु ।
एवं हि भावाः परिकल्पनीयास्तैरेव भावोत्थफलानि[1] यस्मात् ॥

इति । तथा फलवैषम्ये सत्यनुभवविसंवादात् प्रमाणचतुष्टयविरोधश्च जायते । तस्मादस्मदुक्तमेव भावानयनं ग्राह्यमित्यलमतिप्रसङ्गेन ॥

अथ ग्रन्थलाघवात् केषांचित् स्थानानां समुदायव्यापिनीं प्रत्येकव्यापिनीं च संज्ञामाह—

लग्नात्सुतं च नवमं च विदुस्त्रिकोणं तस्माच्चतुर्थ[2]निधने चतुरश्रसंज्ञे।प्रत्येकमस्तसुखकर्मविलग्नभानां स्यात्केन्द्रकण्टकचतुष्टयनामधेयम् ॥१४॥

लग्नात् पञ्चमनवमौ राशी त्रिकोणमित्याहुः । तथा लग्नाच्चतुर्थाष्टमस्थाने चतुरश्रमाहुः । सप्तमचतुर्थदशमलग्नराशीनां केन्द्रादिनामत्रयमपि स्यात् । सप्तमादीनां प्रत्येकं केन्द्रादिसंज्ञा स्यात् । प्रत्येकं स्यादिति वा । एतास्संज्ञास्सप्तमादिस्थानसमुदायस्य प्रत्येकमेकैकस्थानस्य च स्युरित्यर्थः ॥

केन्द्रात्परं पणपरं कथयन्त्यापोक्लिबं ततश्च परम् । [3]रिपुविक्रममेषूरणभवभवनान्युपचयाभिधानानि ॥ १५ ॥

केन्द्रात्—लग्नचतुर्थसप्तमदशमस्थानेभ्यः परं द्वितीयपञ्चमाष्टमैकादशस्थानानि पणपरसंज्ञानि कथयन्ति । ततः—पणपरस्थानात् परं तृतीयषष्ठनवमद्वादशस्थानानि आपोक्लिबसंज्ञानि । आपोक्लिममित्यन्ये । तथाचात्रिः—

1 योगोत्थफलानि. 2 मरणे. 3 ऋतु.

तृतीयनवषष्ठान्त्या आपो क्लिमा इति स्मृताः । इति ।
षष्ठतृतीयदशमैकादशस्थानान्युपचयसंज्ञानि । इह त्रिषड्दशैकादशस्थानानामुपचयसंज्ञाभिधानात्तदन्यान्यष्टौ स्थानान्यनुपचयसंज्ञानीत्यर्थादेव सिद्धम् । तथा च वराहमिहिरः—

त्रिषडेकादशदशमान्युपचयसंज्ञान्यतोऽन्यानि । इति ।
ननु क्वचिदुपचयपणपरसंज्ञाद्वयसन्निपातात् क्वचिदुपचयपणपरत्रिकोणादिसंज्ञात्रयसन्निपातात् किन्निबन्धनमिदं फलं ग्राह्यमिति संशयस्स्यात्, न, यदा पणपरत्वेन फलं निर्दिश्यते तदा पणपरमेव, यदा तूपचयत्वेन तदोपचयं, यदा त्रिकोणत्वेन तदा त्रिकोणमेवेति । किञ्च—

अयुगोजाख्यं विषमं स्थानं युग्युग्मसंज्ञितं तु समम् । संख्यास्तु लोकसिद्धाः क्षितिरसबाणानलादिवस्तूनाम् ॥ १६ ॥

विषमं स्थानं प्रथमतृतीयादि विषमसङ्ख्यो मेषाद्यो राशिर्लग्नादिभावश्च अयुक्संज्ञ ओजसंज्ञश्च स्यात् । द्वितीयचतुर्थादिसमसङ्ख्यः वृषभाद्यो राशिः धनाद्यो भावश्च युक् संज्ञः युग्मसंज्ञश्च स्यात् । अथ संख्यानिर्देशो कर्तव्ये लाघवेन सौष्ठवेन चाभिधातुं भूतसङ्ख्याप्रसिद्धिमाह—सङ्ख्यास्तु लोकसिद्धा इति । क्षितिः भूमिरेका, रसाः मधुरादयः षट्, बाणाः पञ्च सम्मोहनादयः, अनलाः वह्नयस्त्रयोऽन्वाहार्याद्याः[1] आदिशब्देन शैलसमुद्रादयो गृह्यन्ते । क्षित्यादिवस्तूनां सङ्ख्या एकत्वाद्याः लोकप्रसिद्धा एव । त इह नोच्यन्त इति

[1] गार्हपत्याद्याः.

शेषः । वक्ष्यमाणाः क्षित्यादिशब्दाः एकादिसंख्यावाचकाः लोकप्रसिद्ध्यैव ग्राह्या इत्यर्थः । यथा भूरेका । अश्विनौ द्वौ । वह्नयस्त्रयः । समुद्राश्चत्वारः । बाणाः पञ्च । रसाष्षट् । शैलास्सप्त । वसवोऽष्टौ । नन्दा नव । दिशो दश । रुद्राः एकादश । आदित्याः द्वादश । विश्वे त्रयोदश । मनवश्चतुर्दश । तिथयः पञ्चदश । नृपाष्षोडश । अत्यष्टयस्सप्तदश । पुराणान्यष्टादश । अतिधृतयः एकोनविंशतिः । [1]नखाः विंशतिः । समिध एकविंशतिः आकृतिर्द्वाविंशतिः । विकृतिस्त्रयोविंशतिः । जिनाश्चतुर्विंशतिः । [2]अभिकृतिः पञ्चविंशतिः । उत्कृतिष्षड्विंशतिः । नक्षत्राणि सप्तविंशतिः । दन्ताः द्वात्रिंशत् । देवास्त्रयस्त्रिंशत् । इत्यादिलोकप्रसिद्धत्वादिह नोच्यन्ते ॥

अथ प्रश्नलग्नात् कार्यसिद्ध्यसिद्धिज्ञानाय राशीनां शीर्षपृष्ठोभयोदयत्वमाह—

धनुःप्रथमकर्कटौ वृषमृगौ च पृष्ठोदया-
स्त एव सयमा निशाबलभृतोऽथ मूर्धोदयाः ।
परे दिनबला द्विधा झष उदेत्यथाजादयो
नृयोषिदभिधाश्चरस्थिरचरोभयाख्याः क्रमात् ॥ १७

धनुर्मेषकर्कटवृषभमकराः पञ्च राशयः पृष्ठोदयाः पृष्ठेनोद्यन्तीत्यर्थः । सयमाः मिथुनसहिताः त एव धनुराद्याः रात्रिबलवन्तः । धनुर्मेषवृषकर्कटमकरामिथुनाः षड्राशयो रात्रिबलोदया इत्यर्थः ।

अथ—कात्स्न्र्येन । सर्वे परे—उक्तेभ्योऽन्ये राशयश्शीर्षोदया दिनबलाश्च भवन्ति । (तत्र) पृष्ठोदयेभ्योऽन्ये सिंहकन्यातुलाकीटकुम्भमीनराशयः शीर्षोदयाः, रात्रिबलेभ्योऽन्ये सिंहकन्यातुलाकीटकुम्भमीनाष्षड्राशयो दिनबलाः, द्विधा झषः—मीनो द्विधा शीर्षपृष्ठाभ्या-

मुदेति । मीनास्त्वितरेतराविपर्याश्लिष्टमीनद्वयात्मकः । तयोरेकश्शिरसा अन्यः पृष्ठेनोदेति । अतस्स उभयोदयः । तथा च वराहमिहिरः—

गोजाश्विकर्किमिथुनास्समृगा निशाख्याः पृष्ठोदया वि-
मिथुनाः कथितास्त एव । शीर्षोदया दिनबलाश्च भव-
न्ति शेषा लग्नं समेत्युभयतः पृथुरोमयुग्मम् । इति ।

इह राशीनां निशादिनबलत्वकथनं संज्ञामात्रसम्पादकम् । तेषां तु बलस्योत्तरत्र वक्ष्यमाणत्वात् । संज्ञानप्रयोजनं चोक्तं कृष्णेन—

पृष्ठोदये तु सिध्यत्यशुभं मूर्धोदये शुभं कार्यम् ।
उभयोदये विमिश्रं ग्रहरहितेभ्यः फलं वाच्यम् ॥ इति ।

द्वितीयोऽथशब्दस्संज्ञान्तरारम्भार्थः । मेषादयस्सर्वे नरयोषित्संज्ञाः क्रमात् षडावृत्त्या भवन्ति । विषमाः पुंसंज्ञाः । समाः स्त्रीसंज्ञा इत्यर्थः । तेषु पुंराशयः क्रूराः । स्त्रीराशयः सौम्यास्स्युः । अपि च मेषाद्यास्त्रयस्त्रयः क्रमात् चतुरावृत्त्या चरस्थिरोभयाख्या भवन्ति । तथाच वराहमिहिरः—

क्रूरस्सौम्यः पुरुषवनिते ते चरागाद्विदेहाः । इति ।

अत्र चरग्रहणं चरस्थिरौ द्वावेव प्रकृती इति प्रदर्शनाय । तथाहि—उभयस्तूभयात्मकः । तस्य पूर्वमर्धं स्थिरमन्यच्चरम् । तथा च—स्थिरवत्प्रथमेऽर्धे स्यात् न परे चरराशिवत् सर्वम् ॥ इति ।

अथ राशीनामूर्ध्वमुखादि संज्ञामाह श्लोकार्धेन—

मुक्तारूढयियासितानि भवनान्युष्णात्त्विषोपर्य-
धस्तिर्यग्भूतमुखान्यथैवमपरे प्राहुश्चरादीन्यपि ।

रविणा भुक्तोज्झिताक्रान्तबुभुक्षितानि भवनानि ऊर्ध्वाधस्तिर्यङ्मुखानि प्राहुः । अर्केण भुक्तोज्झितो राशिरूर्ध्वमुखः । आक्रान्तो राशिरधोमुखः । भोज्यस्तिर्यङ्मुखः इत्यर्थः । अथानन्तरमप्येवं त्रीणि त्रीण्यूर्ध्वाधस्तिर्यङ्मुखानि स्युरिति शेषः । तथा च कृष्णः—

ऊर्ध्वमुखो रविमुक्तो राशिर्युक्तस्त्वधोमुखो ज्ञेयः ।
अभिलषितस्तिर्यास्यस्तेषां केन्द्राश्च तत्संज्ञाः ॥ इति ।

तत्प्रयोजनं च तेनैवोक्तं—

ऊर्ध्वमुखो यदि राशिर्होरा लग्ने नरस्य सिद्धिकरी ।
[1]अन्यौ विफलं वदतश्शुभयुत[2]दृष्टौ शुभाख्यौ च ॥ इति

अपरे—यवनेश्वरादयश्चरस्थिरोभयान्यप्यूर्ध्वाधस्तिर्यङ्मुखानि प्राहुः । चरराशिरूर्ध्वमुखः । स्थिरराशिरधोमुखः । उभयस्तिर्यङ्मुख इत्यर्थः ।

अथार्धेन राशिषु पुष्करांशानाह—

भागान् भेषु विदुस्समिन्मनुजिनक्ष्माभृन्मितान् पुष्करान् शैलाङ्कान् शरपावकान् वसुरसान् क्ष्माग्नीन्नवांशानपि ॥ १८ ॥

राशिषु मेषसिंहचापादिषु चतुर्षु चतुर्षु समिन्मनुजिनक्ष्माभृन्मितान् एकविंशतिचतुर्दशचतुर्विंशतिसप्तसङ्ख्यान् भागान् पुष्करांशान्विदुः । मेषसिंहचापेष्वेकविंशोंऽशः । वृषकन्यामृगेषु चतुर्दशोंऽशः । युग्मतुलाकुम्भेषु चतुर्विंशोंऽशः । कर्किकीटमीनेषु सप्तमः । एते पुष्करसंज्ञा भागा इति । तथा च सर्वसिद्धौ—

---

[1] अन्ये. [2] दृष्टे शुभाख्ये.

भूतोत्तरस्तत्त्वांशा सन्निकोणे ज सागरे ।
निन्दिताः पुष्करांशास्तास्समिन्मनुजिना ॥ इति ॥

तथा राशिष्वेतानंशान् नवांशानपि पुष्करानाहुः । यथा--मेष सिंहचापेषु सप्तमनवमौ । वृषकन्यामृगेषु पञ्चमतृतीयौ । मिथुन तुलाकुम्भेष्वष्टमषष्ठौ । कर्किकीटमीनेष्वाद्यतृतीयौ । एते पुष्करसंज्ञा नवांशा इत्यर्थः । तथाचोक्तं—

मेषे सप्तमनवमौ वृषभे च तृतीयपञ्चमावंशौ ।
षष्ठाष्टमौ च मिथुने कर्किण्याद्यं तृतीयं च ॥
यद्यद्राशौ प्रोक्तं तदेव तस्मात्तु पञ्चमे नवमे ।
एतत्सर्वं विद्यात् पुष्करदेशं बुधैर्दृष्टम् ॥ इति ॥

एवं राशिसंज्ञामुक्त्वा ग्रहसंज्ञां कक्तुमुपक्रमते —

प्रकाशकौ द्वौ प्रथमौ ग्रहाणां
ताराग्रहाः पञ्च परे ततो द्वौ ।
तमोग्रहौ तेषु शुभास्तु मध्ये
त्रयो बलीन्दुश्च परे तु पापाः ॥ १९ ॥

ग्रहाणां प्रथमौ द्वौ सूर्येन्दू प्रकाशकसंज्ञौ स्तः । ताभ्यां परे पञ्च कुजबुधगुरुशुक्रमन्दाः ताराग्रहसंज्ञाः । तेभ्यः परौ द्वौ राहुकेतू तमोग्रहसंज्ञौ । एवं त्रिविधा ग्रहा इत्यर्थः । केचिदेवं व्याचक्षते—प्रकाशकौ ग्रहणामाद्यौ द्वौ स्तः । ताराग्रहाः पञ्च ततः परे स्युः । ततस्तमोग्रहौ द्वौ स्तः । एवं नव ग्रहा इति । तेषु नवग्रहेषु त्रिधाकृतेषु मध्यत्रिकगताः बुधगुरुशुक्रास्त्रयः । बली चेष्टा स्थानवीर्यान्विश्चन्द्रश्च एते चत्वारश्शुभसंज्ञाः । उक्तेभ्योऽन्ये

सूर्यकुजमन्दराहुकेतवः सक्षीणचन्द्राष्षडेते पापसंज्ञाः । तु शब्दो बुधस्य पापयोगेन पापत्वाभिधानार्थः । यथाह वराहमिहिरः—

क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापा बुधस्तैर्युतः ॥ इति ।

(इह)यवनेश्वरेण चतुर्विधा ग्रहा उक्ताः । क्रूरपापसौम्यमिश्रा इति । तथा च तद्वाक्यं—

क्रूरग्रहोऽर्कः कुजसूर्यजौ च पापौ शुभाश्शुक्रशशाङ्क
जीवाः । सौम्यस्तु सौम्यो व्यतिमिश्रितोऽन्यैर्वर्गैस्तु तुल्यः
प्रकृतित्वमेति ॥ इति ।

कैश्चित्त्रिविध एव । तथा च भरद्वाजः—

पापग्रहौ द्वौ विज्ञेयौ लोहिताङ्गशनैश्चरौ ।
आदित्यो दारुणोऽत्यन्तं शेषास्सर्वे शुभावहाः ॥ इति ।

कैश्चित् द्विविधा एवेति । तथा च स एव (भरद्वाजः)—

गुरुशुक्रबुधास्सौम्याः क्रूरास्सौरारभास्कराः ।
द्वैधीभावश्शशाङ्कस्य इति केचिद्व्यवस्थिताः ॥ इति ।

अत्रैतदुक्तं भवति—ग्रहाणां द्वे एव प्रकृती—सौम्यता पापता चेति । क्रूरत्वं पापत्वगतभावविशेष इति तत्रैवान्तर्गतम् । मिश्रत्वमुभयोरपि, यदा सौम्यस्तदा न पाप इति, यदा तु पापस्तदा न सौम्य इति । यतस्तयोर्विरुद्धधर्माश्रययोर्युगपत्प्राप्तिरनुपपन्ना, तस्मात् द्वे एव ग्रहाणां प्रकृती इति स्थितम् ॥

नन्विह नवैव ग्रहा इति निगदितं । अन्यैस्तु सप्त महाग्रहाः पञ्च तमोग्रहा इत्युक्तम् । तथा च भरद्वाजः ॥

(क्षीणेन्द्वर्कयमाराः पापास्तैस्संयुतस्सौम्यः । इति)

सूर्यो निशाकरश्शुक्रो लोहिताङ्गश्शनैश्चरः ।
सोमपुत्रो गुरुश्चेति नित्यं सप्त महाग्रहाः ॥
राहुः केतुस्तथा रेखाः परिवेषश्च कार्मुकम् ।
ग्रहास्तु पञ्च विज्ञेया अप्रकाशेन सञ्चराः ॥ इति ।

इह राह्वादीनां फलस्य कादाचित्कत्वात् ग्रहत्वमनियतमिति सूर्यादयस्सप्तैव महाग्रहा इत्युपपन्नम् । तथा चायमेव

लोकस्य विपरीतार्थं दृश्यन्ते गूढसञ्चराः
अप्रकाशे फलं नास्ति प्रकाशे तु महत् फलम् ।
प्राधान्यं भास्कराद्येषु सप्तस्वेव प्रतिष्ठितम् । इति ।

सिद्धान्तेष्वपि सप्तैव ग्रहाः कथिताः । तथाच सूर्यसिद्धान्ते ग्रहसर्गद्वारेणोक्तं—

अग्नीषोमौ भानुचन्द्रौ भूतान्यङ्गारकादयः ।
तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्च जज्ञिरे । इति ।

ग्रहकक्ष्याश्च सप्तानामेवाभिहिताः । तथाचोक्तम्—

ब्रह्माण्डमध्यपरिधिर्व्योमकक्ष्याऽभिधीयते ।
तन्मध्ये भगणं भानां तदधोऽधः क्रमादमी ।
मन्दामरेड्यभूपुत्रसूर्य[1]शुक्रबुधेन्दवः ।
परिभ्रमन्त्यधोऽधस्तात् सिद्धविद्याधरा घनाः । इति

किञ्च राहुकेत्वोः पातोच्चत्वमेव ग्रहगतिकारणम् । तथाचोक्तं—

अदृश्यरूपाः कालस्य मूर्तयो भगणाश्रिताः ।
शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः । इति ।

[1] शुक्रेन्दुजेन्दवः.

अपि च होराशास्त्रेषु सूर्यादीनां सप्तानामेव वर्गाधिपत्यं, सप्तानामेव दशापरिग्रहश्च। तस्मात् सप्तैव ग्रहा इति सुव्यक्तम्। अथ केचिदनुमानेन तयोर्ग्रहत्वं समर्थयन्ति। यथा—राहुकेतू ग्रहौ, गतिमत्त्वात्, कुजादिवत्, यो गतिमान् स ग्रहः, यथा कुजादयः, तथा-चेमौ, तस्मात् ग्रहावेवेति। अयमपि गतिमत्त्वस्य साधनस्य विपक्षे कुजपातोच्चादौ सत्वादनैकान्तिको नाम हेत्वाभासः। तस्मादनुमानेनापि तयोरग्रहत्वमेव। यथा—राहुकेतू न ग्रहौ, चन्द्रपातोच्चत्वात्, कुजादिपातोच्चवदिति। यद्वा प्रसंगद्वारेणाप्यग्रहत्वं, यदि राहुकेत्वोर्ग्रहत्वं, तत् कुजपातोच्चयोरपि ग्रहत्वं स्यादेव, उभयेषां पातोच्चत्वस्याविशेषादिति। तस्मात् सप्तैव ग्रहा इति स्थितम्॥

अत्रोच्यते—यदुक्तं प्रसङ्गद्वारेणाग्रहत्वं, नैतत्, यदि राहुकेत्वोश्चन्द्रपातोच्चत्वादग्रहत्वमुच्यते, तर्हि सूर्यस्यापि कुजादिशीघ्रोच्चत्वादग्रहत्वं स्यात्। तस्मिन्नुभयलक्षणोपपन्नत्वेनोभयविषयत्वं तुलायां प्रमाणप्रमेयव्यवहारवत् स्यादिति चेत्, तदनयोः केन वार्यते। अपिच—चन्द्रोच्चपातौ केतुराहुग्रहौ स्तः, उभयलक्षणोपपन्नत्वात्, सूर्यवत्। य उभयलक्षणसम्पन्नस्स ग्रहः, यथाच सूर्यः, तथाच राहुकेतू, तस्मात्तौ ग्रहावेवेति। यच्च—वर्गाधिपत्याभावात् तयोरग्रहत्वमुक्तं, तदसत्—यदि राश्यादीनां षण्णां समुदायस्य वर्गसंज्ञा तर्हि सूर्येन्द्वोरपि वर्गाधिपत्याभावः। अथैकैकस्य, तदाधिपत्यस्य प्राचुर्यात् कुजादीनां प्राधान्यं स्यात्। सूर्येन्द्वोराधिपत्याल्पत्वादप्राधान्यं च। तस्मान्न वर्गाधिपत्यनिबन्धनं ग्रहत्वम्। नापि दशाधिपत्यात्, लग्नस्यापि ग्रहत्वप्रसङ्गात्। अथवा—राहुकत्वोरपि दशाधिपत्यमस्त्येव। यतस्तयोरपि नक्षत्रदशापिण्डदशादिष्वन्तर्दशा चास्ति।

नापि कक्ष्यावत्त्वात्, ऋक्षाणामपि ग्रहत्वप्रसङ्गात् । अथवा तयोरपि कक्ष्याऽस्त्येव । गतिमतां सर्वेषां कक्ष्याभिधानात् । तथाचोक्तं—

इष्टग्रहस्य भगणैर्गगनस्य वृत्तं
भक्त्वाथ तस्य परिधिं लभते समन्तात् । इति ।

यच्च सूर्यादिभिस्सह सर्गाभावात् तयोरग्रहत्वमुक्तं, नैतत्सारं-यतः पश्चाल्लब्धसर्गयोरपि तयोर्देवप्रसादासादितं ग्रहत्वं किं न स्यात् ? यथा तारागणेन सहासृष्टानामपि तपःप्रभावादवाप्ततत्स्थानानां अगस्त्य[1]मृगव्याधादीनां तारात्वं न हीयते । अत्र नारदः—

अमृतास्वादनाद्धेतोश्शिरश्छिन्नोऽपि नो मृतः ।
विष्णुना तेन चक्रेण तथाऽपि ग्रहतां गतः ।
वरेण धातुरर्केन्दू ग्रसते सर्वपर्वसु ।
विक्षेपावनतिवशात् राहुर्दूरगतस्तयोः । इति.

यच्च कादाचित्कफलत्वादग्रहत्वमुक्तं, तदप्यसत्, कुजादीनामप्यग्रहत्वप्रसङ्गात्, यतस्तेषामपि कादाचित्कफलत्वमस्ति । यथाऽऽह रल्लः—

नीचस्था ग्रहविजिता अभिभूता विरश्मयो ह्रस्वाः ।
उरगा इव मन्त्रहता भवन्त्यकार्यक्षमा लग्ने ।

इति । भरद्वाजेनापि तयोः प्रकाशाप्रकाशयोः प्राबल्यदौर्बल्ये उक्ते । न ग्रहत्वाग्रहत्वे ।

यदपि परिवेषादीनां ग्रहत्वमभ्यधायि, तत् केतूनामनेकेषां मध्ये तेषां [2]प्राधान्यख्यापनार्थम् । न तु ग्रहाणां द्वादशत्व-

---

[1] भृग्वादीनां [2] प्राबल्य

सिद्धये। तेन राहोः भगणार्धवर्ती केतुरेक एव ग्रहत्वभाक्। अन्येऽपि तज्जातिमात्रभृतो बहवस्सन्ति। न तेषां पृथक् ग्रहत्वमस्ति, ते सर्वे तद्भेदाः। यथोक्तं नरपतिना—

ऋक्षाधानगतो राहुर्यत्र ऋक्षे व्यवस्थितः।
तस्मात्पञ्चदशे ऋक्षे पुच्छं तस्य विनिर्दिशेत्॥
एकोत्तरं शतं यत्र केतवः समुपस्थिताः।
व्याप्नुवन्तो जगत्सर्वं सहस्राऽर्कसमत्विषः॥ इति।

पञ्चदशे ऋक्षे इत्युपलक्षणम्। तेन चतुर्दशे पञ्चदशे वा यत्र भे भगणार्धं भवति तत्र केतुरित्यर्थः। स्यादेतत्—चन्द्रोच्चस्य अग्रहत्वं प्रतिज्ञाय राहोर्भगणार्द्धवर्तिनो ग्रहत्वं निगमितमिति प्रतिज्ञाहानिस्स्यात्, नैष दोषः, प्रागपि केतोर्ग्रहत्वं प्रतिज्ञातं तदेव निगमितम्। अपि तु केतुसामान्यविशिष्टत्वेन चन्द्रोच्चमपि पक्षत्वेन कक्षीकृत्य यद्दूषणमभ्यधायि, तदेव निरासीति न प्रतिज्ञाहानिः। तस्मात् नवैव ग्रहा इति सिद्धम्।

तेषु शुभपापानां संज्ञामाह—

असत्क्रूराह्वयाः पापाश्शुभास्सत्सौम्यसंज्ञिताः।

सन्तः शुभाः, तेभ्योऽन्ये असन्तः अशुभाः क्रूराः पापाः इत्यभिन्नार्थाः। शुभाः सन्तः सौम्या अपापाः इत्येकार्था इत्यर्थः। श्लोकार्धेनाभिधेयस्वरूपमाह—

कालश्शुभक्रियायोग्यो मुहूर्त इति कथ्यते॥

विवाहादिशुभकर्मविधानयोग्यः प्राणाविघटीघटिकादिः मुहूर्त इत्युच्यते। ननु कथं त्रुट्यादिः काल इति वक्तव्ये प्राणादिरि-

त्युक्तम्, उच्यते—कालस्तावद्द्विविधः—मूर्तोऽमूर्तश्च । तत्र प्राणादिर्मूर्तः । स स्थूलः । त्रुट्यादिरमूर्तः । स सूक्ष्मः । तथा च श्रीपतिः—

कालः स्थितिप्रलयसर्गनिमित्तभूतः स्थूलाणुरूपपरिकल्पनया द्विधाऽसौ । त्रुट्यादिकोऽणुरनणुस्त्वसुपूर्वकस्स्यात्
सूक्ष्मो ह्यमूर्त इतरः कथितोऽत्र मूर्तः ।

इति ।

तत्र स्थूल एव कालो दैवज्ञैरादेष्टुं शक्यः । सूक्ष्मस्तु स्वनियतपुराकृतसुकृतैकलभ्यत्वात् न केन चिदादेष्टुं शक्यः । तथा च नारदः—

स्वस्थे नरे सुखासीने यावत् स्पन्दति लोचनम् ।
तस्य त्रिंशत्तमो भागस्तत्पलः परिकीर्तितः ॥
तत्पलात् शतमो भागस्त्रुटिरित्यभिधीयते ।
त्रुटेस्सहस्रभागो यो लग्नकालस्स उच्यते ।
देवोऽपि तन्न जानाति किं पुनः प्राकृतो जनः ।
स कालोऽप्यन्यकालो वा पूर्वकर्मवशाद्भवेत् ।
निमित्तमात्रं दैवज्ञः तद्वशान्न शुभाशुभम् ॥ इति ।

यदि लग्नकालः पुराकृतसुकृतैकलभ्यत्वात् दैवज्ञैरनादेश्यः, कुतः तर्हि दैवज्ञैस्तत्काललग्नानयनगुणदोषनिरूपणादेरादरः ।

यस्मिन्देशे च काले च यन्मुहूर्ते च यद्दिने ।
हानिर्वृद्धिर्यशो लाभस्तत्तथा न तदन्यथा ॥ इति ।
लब्धव्यानेव लभते गन्तव्यान्येव गच्छति ।
प्राप्तव्यान्येव चाप्नोति दुःखानि च सुखानि च ।

इति वचनान्यनुसृत्य मुहूर्तनिरूपणमन्तरेणैव शुभक्रियाः कार्याः। ततश्चास्य शास्त्रस्य वैयर्थ्यं प्रसज्येत। अत्रोच्यते—यद्यपि लग्न कालः स्वसुकृतलभ्यः, तथापि दैवज्ञैः कालनिरूपणमवश्यमादरणीयं श्रुतिस्मृत्युक्तत्वात्। स्वविहितनित्यकर्माचरणवत्। तथा च तत्कर्मसु कालाभिधानं श्रूयते—

'यां कामयेत दुहितरं प्रिया स्यादिति तां निष्टचयां दद्यात्। यं कामयेतानपजय्यं जयेदिति तमेतस्मिन्नक्षत्रे यातयेत्। वसन्ते ब्राह्मणोऽग्निमादधीत। कृत्तिकास्वग्निमादधीत। यान्येव देवनक्षत्राणि तेषु कुर्वीत। यत्कारी स्यात्' इत्यादि। तथा च स्मर्यते—

ऋतावुपगमश्शस्तः स्वपत्न्यामवनीपते!।
पुन्नर्क्षे शुभे काले श्रेष्ठं युग्मासु रात्रिषु॥ इति।

याज्ञवल्क्येनाप्युक्तं—

एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत्।
सुस्थ इन्दौ सकृत् पुत्रं लक्षण्यं जनयेत्पुमान्॥ इति।

बौधायनेन कन्यावरणे काल उक्तः—

'उदगयन आपूर्यमाणपक्षे पुण्ये नक्षत्रे युग्मान् ब्राह्मणान् वरः प्रहिणोति' इति। अपि च रोहिणीमृगशीर्षमुत्तराफल्गुनीस्वातीति विवाहस्य नक्षत्राणि। पुनर्वसुतिष्यहस्तश्रोणारेवतीत्यन्येषां भूतिकर्मणां यानि चान्यानि पुण्योक्तानि। गृह्यकारेणाप्युक्तम्—

प्रयोगशास्त्राविहितः कालो यत्र न कश्चन।
विधत्ते ज्योतिषं तत्र विहितेऽत्र विरोधि तत्॥

इत्यादि श्रुतिस्मृतिपुराणगृह्यशास्त्रेषु शुभक्रियाणां कालनिरूपणतया विहितत्वात् कालाभिधायिनो ज्योतिश्शास्त्रस्य न वैयर्थ्यप्रसङ्गः। अपि च यदीदं शास्त्रं न प्रारभिष्यत तत् कथं कालज्ञानं समपत्स्यत। तदज्ञाने क्रिया न प्रपत्स्यन्ते। प्रवृत्ता वा न फलाय कल्पिष्यन्ते। तदप्रवृत्तौ देवो न वर्षिष्यति। तदवर्षणे ओषधयो न प्रादुष्ष्युः। तदप्रादुर्भावे प्रजा न प्राण्यासुः। ततश्च विश्वमेव असत् स्यात् इति महदानिष्टमापद्येत। किञ्च कालाज्ञाने लोकस्स्वाचारात् प्रभ्रश्येत। स्वाचारप्रभ्रष्टस्य दूष्प्रजा प्रजायेत। प्रजादोषात् दुर्गतिं यास्यति। दुर्गतेः पाप्मानं करिष्यति। पाप्मना नरकमाप्नुयादित्यपि महदनिष्टं प्रसज्येत। ततश्च नैव वैयर्थ्यप्रसङ्गः। यद्वा प्राचीनजन्मोपचितसदसत्कर्मफलविपाकाभिव्यञ्जनमेव ज्योतिश्शास्त्रेणानुशिष्यत इति। यथोक्तं लघुजातके—

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम्।
व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव। इति।

अन्यत्रापि—

नक्षत्राणि ग्रहाश्चैव शुभाशुभनिवेदकाः।
मानवानां महाभागे न तु कर्मकरास्स्वयम्॥
प्रजानां तु हितार्थाय शुभाशुभविधिं प्रति।
अनागतमतिक्रान्तं ज्योतिश्चक्रेण वेद्यते। इति।

कर्मविपर्यासस्तु केनापि दुष्करः। स्वकृतस्य कर्मणोऽवश्यभोक्तव्यत्वात्। तथाचोक्तं—

अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ इति ।

यदि स्वकृतमेव नृभिरनुभूयते न ग्रहकृतमिति, कथं तर्हि ग्रहवैषम्ये फलमशुभमनुभूयते, ग्रहसाम्ये शुभं फलमिति । अत्रोच्यते— पुंसां सत्कर्मपाककाले ग्रहसाम्यं स्यात् । दुष्कर्मपाककाले ग्रहवैषम्यं (प्रसज्येत) संपद्येतेति अत्राहुः—

किन्तु तत्र शुभं कर्म सद्ग्रहैस्तु नियुज्यते ।
दुष्कृतं वा शुभैरेव समवायो भवेदिति ॥
तस्माद्धि ग्रहवैषम्ये विषमं कुरुते जनः ।
ग्रहसाम्ये शुभं कुर्यात् जात्या जात्या पुराकृतम् ॥
केवलं ग्रहनक्षत्रं न करोति शुभं यदि ।
सर्वमात्मकृतं कर्म लोकवादो ग्रहा इति ॥

ग्रहैरपि पुंसां स्वकर्मविपर्यासः कर्तुं न शक्यते । तर्हि स्वकर्माभिव्यञ्जनमप्यसुकरम् । तथाऽप्यशुभं कर्मफलमनुभवतः शुभ काले कर्म कुर्वतोऽपि शुभफलानुभवो न सम्भवति । शुभं कर्मफलमनुभवतो दुष्काले कर्म कुर्वतोऽपि शुभफलानुभव एव दृश्यते । नैतदस्ति । तत्र शुभोऽपि लग्नकालः प्रबलैः प्राचीनासत्कर्मभिरशुभत्वमानीयते । तथा दुष्कालोऽपि सत्कर्माभिश्शुभत्वमुपनीयते । तथा च विवाहाध्याये वराहमिहिरेणोक्तं—

उद्वाहे नियतिर्नयत्यतिबला वेलां समं प्राक्फलैः । इति ।

ननु 'बली पुरुषकारो हि दैवमप्यतिवर्तते' इति वचनात् शास्त्रार्थानुभवकौशल्यादिभिश्शुभलग्नकाल एव निरूपयितुं शक्यः ।

तथा छायाम्बुयन्त्रादिपुरुषकारपरीक्षाकारेण विदग्धैर्दैवज्ञैः कथंचित् यथोक्तो लग्नकाल एव ग्रहीतुं शक्यते । तथाचोपनयनप्रकरणे नारदेनोक्तं—

जन्मनः प्रथमस्येह कालो दैवेन चोदितः ।
तस्मात् स एव दैवज्ञैः शुभः कर्तुं न शक्यते ॥
द्वितीयजन्मनः कालः शक्यते ज्ञानिनो बलात् ।
शुभः कर्तुमतो नृणां सर्वसंपत्समृद्धये ॥ इति ।

अत्रोच्यते—दैवादृते केवलपुरुषकारेण सत्कालो नावाप्यते, नापि पुरुषकारमन्तरेण दैवेनैव । यथा—वृष्ट्या विना केवलं पुरुषकृतया कृष्या न फलसिद्धिः । नापि कृषिमन्तरेण दैवकृतया वृष्ट्यैव फलसंपत्स्यात् । तस्मात यथा—सत्यां दैवकृतायां वृष्टौ कर्षतः पुरुषस्य कृषिवृष्टिसमायोगात् फलसिद्धिस्संपत्स्यते । तथा दैवपुरुषकाराभ्यां संसृष्टाभ्यामेवार्थसिद्धिराप्यते । तथा च बादरायणः—

विना वा मानुषं दैवं दैवं वा मानुषं विना ।
न च निर्वर्तयत्यर्थमेकारणिरिवानलम् ॥
सिद्ध्यन्ति सर्व आरम्भाः संयोगात्कर्मणोर्द्वयोः ।
दैवात्पुरुषकाराच्च न त्वेकस्मात्कथंचन ॥ इति ।

तस्मात् शास्त्रार्थानुभवादिना शुभं लग्नकालं निरूप्य छायादिपरीक्षाप्रयत्नेन प्राणादिकं लग्नकालं संपाद्य सूक्ष्मशुभलग्नकालसिद्ध्यै दैवं प्रतीक्षितव्यम् । तथा च वराहमिहिरः—

यत्नेन संपाद्य मनुष्यकारं यत्नावकाशे पुरुषो निरुन्धे ।
प्रतीक्षते दैवमतन्द्रितो यस्तमापदो नात्मकृतास्स्पृशन्ति ॥ इति ।

यदा पुनर्दैवाविरोधात् दैवज्ञवैदग्ध्यात् बलवता प्रयत्नेन लग्नकालः कश्चिद्गृहीतः तदा पुराकृतमप्यातिशय्य स्वफलं दत्ते। तत्रापि कर्तुः कर्मप्राबल्ये विफलं दत्ते। कर्तुरतिप्रबलविरोधिकर्मानुरोधे सति तत्पुत्रादौ फलं दत्ते। तथा दैवानुगुण्येऽपि दैवज्ञदौर्वैदग्ध्यादिनानादरेण दुष्कालो गृहीतस्तदाऽपि दुष्फलं मुहूर्तजं परिणमत्येव। तथा च सर्वसिन्धौ—

सुखदुःखकरं कर्म शुभाशुभमुहूर्तजम्।
कालान्तरेऽपि वा कुर्यात् फलं तस्यान्वयेऽपि च॥ इति।

तस्मात् दैवानुरोधात् मुहूर्तमपि स्वफलं दत्त एवेत्यलमतिप्रसङ्गेन॥

अथ बलाबलादिज्ञानाय स्वोच्चनीचानाह—

आदित्याद्यजगोमृगास्यवनिताः कर्की च मीनस्तुला स्वोच्चर्क्षाण्यथ तेषु दिग्घुतवहानष्टोत्तरां विंशतिम्। तिथ्यंशान् शरसप्तविंशतिकृतीनत्युच्चकांशान् विदुस्तेभ्यस्सप्तमराशयोंऽशकयुताः नीचा ग्रहाणां क्रमात्॥ २१॥

आदित्यप्रभृति ग्रहाणां सप्तानां क्रमेण मेषादयः सप्त राशयः स्वोच्चसंज्ञाः। तेषु स्वोच्चराशिष्वपि दशमादिभागानत्युच्चांशानाहुः। तद्यथा—आदित्यस्य मेषः स्वोच्चराशिः, तत्र दशमो भागः अत्युच्चांशः। चन्द्रस्य वृषभे तृतीयो भागः। कुजस्य मकरेऽष्टाविंशः। बुधस्य कन्यायां पञ्चदशः। गुरोः कर्कटके पञ्चमः। शुक्रस्य

मीने सप्तविंशः। शनेस्तुलायां विंशो भागोऽत्युच्चांश इत्यर्थः। स्वोच्चराशिभ्यः सप्तमराशयः सूर्यादीनां नीचराशयः। तेषु तत्तत्सङ्ख्यांशकाः अतीव नीचांशकास्स्युः। यथा——आदित्यस्य तुला नीचराशिः, तत्र दशमो भागोऽतिनीचांशः। चन्द्रस्य वृश्चिके तृतीयो भागः। कुजस्य कर्कटकेऽष्टाविंशः। बुधस्य मीने पञ्चदशः। गुरोर्मकरे पञ्चमः। शुक्रस्य कन्यायां सप्तविंशः। शनेर्मेषे विंशो भागोऽतिनीचांश इत्यर्थः। इह दिगादिशब्दानां दशादिसामान्यसङ्ख्याभिधायिनामपि दिगनलादिसङ्ख्यापूरकार्थविशेषग्रहणं ज्योतिश्शास्त्रप्रसिद्ध्या न दुष्यतीत्येवं सर्वत्र द्रष्टव्यम्॥

त्रिकोणांशानाह——

सिंहे विंशतिरादितो गवि परे सर्वेऽशकास्तुङ्गतो मेषे द्वादश पञ्च योषिति परे तुङ्गाद्वयाङ्के दश।
जूके पञ्च घटे तु विंशतिरमी मूलत्रिकोणाह्वयाः सूर्यादेः क्रमशो ग्रहस्य गदिताः शेषास्स्वराश्यंशकाः॥ २२॥

सूर्यादिग्रहाणां क्रमेण सिंहादिराशिष्वमी भागा मूलत्रिकोणा इत्युक्ताः। सूर्यस्य सिंहराशावादितः आरभ्य विंशतिभागाः। इन्दोर्वृषभे स्वात्युच्चसंज्ञात् तृतीयभागात् परे सर्वे सप्तविंशतिर्भागाः। कुजस्य मेषे आदितो द्वादश भागाः। बुधस्य कन्यायां स्वात्युच्चसंज्ञात् पञ्चदशभागात् परतः पञ्चदश भागाः। गुरोर्धनुषि आदितो दश भागाः। शुक्रस्य तुलायामादितः पञ्च भागाः। शनेः कुम्भे आदितो विंशतिर्भागाः, मूलत्रिकोणाख्याः। शेषा

मूलत्रिकोणांशेभ्यः परतः परिशिष्टा भागाः स्वराश्यंशकाः स्वराशिसंबन्धिनो भागाः अर्वाचीनाः स्वोच्चांशका इत्यर्थः। उक्तं च सारावल्याम्—

विंशतिरंशास्सिंहे त्रिकोणमपरे स्वभवनमर्कऽस्य।
उच्चं भागत्रितयं वृष इन्दोः स्वत्रिकोणमपरेंऽशाः॥
द्वादश भागा मेषे त्रिकोणमपरे स्वभं च भौमस्य।
उच्चफलं कन्यायां बुधस्य तुङ्गांशकैस्सदा चिन्त्यम्॥
परतस्त्रिकोणजातं पञ्चभिरंशैस्स्वराशिजं परतः।
दशभिर्भागैश्चापे त्रिकोणमपरे स्वभं च गुरोः॥
शुक्रस्य तु त्रिकोणं विषया जूके परे स्वराश्यंशाः।
कुम्भे त्रिकोणनिजभे रविजस्य रवेर्यथा सिंहे॥ इति।

वराहमिहिरेण राशीनामेव त्रिकोणसंज्ञाभिहिता—

सिंहो वृषः प्रथमषष्ठहयाङ्गतौलिकु-
म्भास्त्रिकोणभवनानि भवन्ति सूर्यात्॥ इति।

तथा सति सिंहादिराशिस्थानां स्वराश्युक्तं त्रिकोणोक्तं वा तदुभयं वा फलं ग्राह्यमिति। चन्द्रस्य वृषभस्थस्य त्रिकोणजं स्वोच्चजं वा तद्द्वयं वा। बुधस्य कन्यास्थस्य स्वोच्चजं त्रिकोणजं वा स्वराशिजं त्रितयं वेति सन्देहस्स्यात्। तन्निरासायायं स्वोच्चत्रिकोणस्वराश्यादि विभागोऽभिहितः॥

अथ ग्रहाणां वर्गानाह—

क्षेत्रं च होरा द्रेक्काणो नवांशो द्वादशांशकः।
त्रिंशांशकश्च षड्वर्गा ग्रहाणां वर्गसंज्ञिताः॥ २३॥

क्षेत्रं—त्रिंशद्भागात्मको राशिः। होरा—राश्यर्धम्। द्रेक्काणः—राशेस्तृतीयो भागः। नवांशो—राशेर्नवमांशः। द्वादशांशकः—राशेर्द्वादशांशकः। त्रिंशांशकः—राशेस्त्रिंशो भागः एते षड्वर्गसंज्ञाः। तत्र नारदः—

त्रिंशद्भागात्मकं लग्नं होरा तस्यार्धमुच्यते।
लग्नत्रिभागो द्रेक्काणो नवांशो नवमांशकः।
द्वादशांशो द्वादशांशस्त्रिंशांशास्त्रिंशदंशकः॥ इति।

एषु राश्यादिर्यो यस्य संबन्धी स तस्य वर्गसंज्ञ इत्यर्थः। तथा च स्वल्पजातके—

ग्रहहोराद्रेक्काणद्वादशत्रिंशन्नवांशभेदश्च।
वर्गः प्रत्येतव्यो ग्रहस्य यो यस्य निर्दिष्टः॥ इति।

चशब्दोऽनुक्तसमुच्चयार्थः। तेन सप्तांशानामपि ग्रहणं। अपिशब्दः पक्षान्तरद्योतनार्थः सप्त वा वर्गसंज्ञा इति॥

तथा च श्रीपतिः—

एवमेव खलु सप्त वर्गजाः।

यद्वा सप्तांशग्रहणेऽपि षडेव वर्गा इति, यतः सूर्येन्द्वोः त्रिंशांशा न सन्ति। भौमादीनां होरा नास्ति। तस्मात् षडेव ग्रहाणां वर्गा इत्युक्तम्॥

राश्यादीनामधिपतीनाह—

भौमः काव्यबुधेन्द्विनज्ञकविभूपुत्रार्यमन्दार्कजा जीवश्च प्रथमादिराशिपतयस्तेषां ग्रहास्ते क्रमात्। मेषैणाननतौलिकर्कटपातिप्रष्ठा नवांशाधि-

पाः तत्तत्स्वामिमुखास्त एव च पुनस्तद्वादशांशेश्वराः ॥ २४ ॥

भौमादयो द्वादश मेषादीनां पतयो भवन्ति। कुम्भमकरयोर्मन्दः। मीनधनुषोर्जीवः। मेषवृश्चिकयोः कुजः। वृषभतुलयोश्शुक्रः। मिथुनकन्ययोर्बुधः। कर्कटस्य चन्द्रः। सिंहस्य सूर्यः स्वामी। तेषां मेषादिराशीनां संबन्धिनो ये नवांशाः सत्र्यंशत्रिभागात्मकाः तेषामीश्वराश्च मेषमकरतुलाकर्कटाद्यास्तदधिपतिपुरोगाश्च प्रागुक्तास्त एव नव नव क्रमेण भवन्ति। यथोक्तं बृहज्जातके—

अजमृगतौलिचन्द्रभवनादि नवांशविधिः। इति।

मेषस्य संबन्धिनो धनुरन्ता नव नवांशाः, तेषां भौमाद्या गुर्वन्ता नव स्वामिनः। वृषभस्य मकराद्याः कन्यान्ताः नव नवांशाः, तत्पतयश्च मन्दाद्या बुधान्ता नव। मिथुनस्य तुलाद्या युग्मान्ता नव नवांशाः, तदधिपाः शुक्राद्या बुधान्ता नव। कर्कटस्य कर्क्याद्याः मीनान्ताः नव नवांशाः, तदधिपाः चन्द्राद्या जीवान्ता नव स्युः। एवं सिंहादिचतुष्टयस्य धन्व्यादिचतुष्टयस्य च नवांशास्तदधिपाश्चावगन्तव्याः। नव कृत्व आवर्तिताः द्वादश राशय एव तत्संबन्धिनः अष्टोत्तरशतं नवांशा भवन्ति। तदधिपतयश्च तावन्तः। अथ मेषादीनां द्वादश सार्धद्विभागात्मकाः तदधिपाश्च तत्तत्स्वामिमुखास्तद्राश्याद्यास्तद्राश्यधिपाद्याश्च त एव प्रागुक्ता राशयो ग्रहाश्च भवन्ति। यथा—मेषस्य मेषाद्या मीनान्ता द्वादशांशकाः, तदधिपाश्च भौमादयो जीवान्ता द्वादश ग्रहाः। वृष(भ)स्य वृषादयो मेषान्ता द्वादशांशाः, तदधिपाः काव्यादयो

भौमान्ता द्वादश इत्यादि । मिथुनमपि द्रष्टव्यम् । तथा च वराहमिहिरः—

'भवनसमांशकाधिपतयः स्वगृहात् क्रमशः' इति ।

एवं मेषादीनां चतुश्चत्वारिंशदुत्तरशतं द्वादशांशास्तदाधिपाश्च तावन्तस्संभवन्ति ॥

एकैकं भवनं दशांशतनवो द्रेक्काणसंज्ञास्त्रयस्तेषां तद्गृहतत्तनूजनवमस्थानेश्वरास्स्वामिनः । होरार्धं भवनस्य सूर्यशशिनोरोजेऽन्यथा ते समेत्वाद्याः क्षेत्रपतेस्तदागमपतेरन्येति चान्ये जगुः ॥

एको राशिः दशभागात्मकास्त्रयस्त्रयो द्रेक्काणसंज्ञा भवन्ति । राशेस्तृतीयभागास्त्रयो दशभागात्मका द्रेक्काणा इत्यर्थः । तेषां प्रथमद्वितीयतृतीयद्रेक्काणानां तद्राशेस्स्वाधिपतिस्तत्पञ्चमाधिपस्तन्नवमाधिपश्च त्रयस्स्वामिनो भवन्ति । यद्राशिसंबन्धी द्रेक्काणस्तस्य प्रथमस्य तदधिपतिरेव, द्वितीयस्य तत्पञ्चमराश्यधिपतिः, तृतीयस्य तन्नवमराश्यधिपतिः स्वामीत्यर्थः । तथा च बृहज्जातके—

द्रेक्काणास्स्युस्स्वभवनसुतस्वत्रिकोणाधिपानाम् ॥ इति ।

राशेरर्धं होरा । एको राशिः पञ्चदशभागात्मके द्वे होरे स्त इत्यर्थः । तथा च वराहमिहिरः—

होरेति लग्नं भवनस्य चार्धम् ॥ इति ।

ते होरे मेषमिथुनादौ विषमराशौ सूर्येन्द्वोः स्वाम्ये स्तः । समे

वृषकर्क्यादौ राशौ शशिसूर्ययोः स्वाम्ये स्तः। विषमराशौ प्रथमहोरायां सूर्यस्स्वामी द्वितीयायाश्चन्द्रः। समराशौ प्रथमायाः शशी, द्वितीयायास्सूर्यस्स्वामीत्यर्थः। तथाचोक्तं—

मार्ताण्डेन्द्वोरयुजि समभे चन्द्रभान्वोश्च होरे। इति।

अन्ये यवनेश्वरादयः एवमाहुः—यद्राशिसंबन्धिनी होरा सा आद्या तद्राश्यधिपतेः, द्वितीया तस्मादेकादशराश्यधिपतेरिति। तथा च यवनेश्वरः—

आद्या तु होरा भवनस्य पत्युरेकादशक्षेत्रपतेर्द्वितीया। इति। तु शब्दो द्रेक्काणानामप्याधिपत्यविकल्पप्रदर्शनार्थः। आद्यो राश्यधिपतेः, द्वितीयो द्वादशराश्यधिपतेः, तृतीय एकादशराश्यधिपतेरिति। तथा च स एव—

स्वद्वादशैकादशराशिपानां द्रेक्काणसंज्ञाः क्रमशस्त्रयोऽत्र। इति। एवं द्रेक्काणाः षट्त्रिंशत् होराश्चतुर्विंशतिः तदधिपाश्च तावन्तः॥

कुजरविसुतजीवसौम्यशुक्राश्शरशरनागगिरीषुभागनाथाः। अयुजि युजि तदंशकाश्च तेषामधिपतयश्च विपर्ययेण गण्याः॥ २६ ॥

विषमराशौ कुजादयः पञ्च शरादित्रिंशद्भागसमुदायपञ्चकस्य स्वामिनः। समराशौ भागास्तदधिपतयश्च विपर्ययेण गण्यन्ते। शुक्राद्याः इष्वादित्रिंशद्भागसमुदायानां स्वामिन इत्यर्थः। इदमुक्तं भवति—एको राशिस्त्रिंशद्भागः। विषमराशावादितः पञ्चानां भागानां

कुजः । ततः षष्ठादीनां पञ्चानां मन्दः, एकादशादीनामष्टानां जीवः, एकोनविंशादीनां सप्तानां बुधः, षड्विंशादीनां पञ्चानां शुक्रः स्वामी, समराशौ प्रथमतः पञ्चानां शुक्रः, षष्ठादीनां सप्तानां बुधः, त्रयोदशादीनामष्टानां जीवः, एकविंशादीनां पञ्चानां मन्दः, षड्विंशादीनां पञ्चानां कुजः स्वामीति । अत्र श्रुतकीर्तिः—

पञ्चाथ पञ्च चाष्टौ सप्त च पञ्चैव विषमभवनेषु ।
धरणिसुतमन्दसुरगुरुबुधशुक्राणां क्रमेणांशाः ॥
पञ्चाथ सप्त चाष्टौ पञ्च च पञ्चैव युग्मभवनेषु ।
भागा भार्गवशशिसुतसुरेज्यशनिभूमिपुत्राणाम् ॥ इति।

त्रिंशांशानां षष्ट्युत्तरत्रिशतं, तदधिपानां षष्टिश्च संपन्ना । सप्तांशाधिपास्तु कल्याणवर्मणोक्ताः—

मेषादिमिथुनमृगहरिमीनतुलावृषभचापधरकर्की ।
घटभृत्कन्यापूर्वाः सप्तांशानां भवन्तीशाः । इति ।

साधिकसप्तमांशालिप्ताश्चतुर्भागाः सप्तांशाः, तेषां विषमराशौ तद्राश्यधिपप्रमुखाः सप्त ग्रहाः स्वामिनः । समराशौ सप्तमाधिपाद्याः सप्तेति चतुरशीतिस्सप्तांशाः तदधिपाश्च तावन्तः ॥

ग्रहदृष्टिकृतफलनिर्णयाय तद्दृष्टिमाह—

सौरिस्तृतीयदशमौ गुरुस्त्रिकोणं कुजस्तु चतुरश्रम् । पश्यति समग्रमितरे चरणाभिवृद्ध्याथ सप्तमं सर्वे ॥ २७ ॥

त्रिदशादिस्थानद्वन्द्वानि मन्दाद्यास्त्रयः समग्रं पश्यन्ति । मन्दस्तृतीयदशमौ, तत्स्थग्रहांश्च पूर्णदृष्ट्या पश्यति । तदन्ये पाद-

दृष्ट्या । गुरुः पञ्चमनवमौ पूर्णदृष्ट्या, तदन्ये द्विपाददृष्ट्या, कुजः चतुर्थाष्टमौ पूर्णदृष्ट्या, तदन्ये षट् त्रिपाददृष्ट्या । सर्वेऽपि सप्तमं पूर्णदृष्ट्या पश्यन्ति । अथशब्दः कात्स्न्र्यवाची, सप्तमं अथ—कृत्स्नया दृष्ट्या पश्यन्ति । अनुक्तानि स्थानानि न पश्यन्तीत्यर्थसिद्धम् । तथा च कृष्णः—

षष्ठं द्वितीयभवनं द्वादशमेकादशं न पश्यन्ति ।
स्वस्थानाद्वीक्षन्ते ग्रहास्तथान्यानि भवनानि ॥ इति ।

अत्रेयमुपपत्तिः—ग्रहाणां स्वस्थानात् सप्तमे पूर्णा दृष्टिः । ततः क्रमेण क्षीयमाणा एकादशे शून्या सप्तमादुत्क्रमात् ह्रसति, षष्ठे शून्यापि च । स्वस्थानात् चतुर्थे पादोना दृष्टिः । तस्मात् क्रमेण हीयमाना पञ्चमेऽर्धोना । षष्ठे शून्या । चतुर्थादुत्क्रमेणापचीयमाना तृतीये त्रिपादोना । द्वितीये शून्या भवति । षष्ठद्वितीयैकादशद्वादशानि भावमध्ये दृष्ट्यभावात् ग्रहा न पश्यन्तीत्युक्तम् । एतद्दृष्ट्यानयनायेदं गणितमुक्तं भवति । द्रष्टृग्रहं दृश्याद्विशोध्य शिष्टं दृष्टिकेन्द्रं, तस्मिन्नेकराश्यूने दशराश्यधिके च न पश्यति । तत्र पञ्चाधिके दक्षिणा दृष्टिः, पञ्चराश्यूने वामा दृष्टिः स्यात् । दृष्टिकेन्द्रं षड्राश्यधिकं राशिदशकाद्विशोध्य शिष्टं लिप्तीकृत्य ज्ञानरथैर्विभजेत् । लब्धा दृष्टिः । अथ पञ्चराश्यधिकं चेत्, राशिपञ्चकमपास्य ज्ञानोदयैर्विभजेत् । राशिचतुष्काधिकं चेत्, राशिपञ्चकाद्विशोध्य शिष्टं ज्ञानतुङ्गैर्विभजेत् । राशित्रयाधिकं चेत्, राशिचतुष्कान्निहत्य शिष्टं लिप्तीकृतं ज्ञानतुङ्गसहितं ज्ञानरथैर्विभजेत् । राशिद्वयाधिकं चेत् राशिद्वयमपास्य शिष्टं कलीकृतं ज्ञानधीयुतं ज्ञानतुङ्गैर्विभजेत् । अथ एकराश्यधिकं चेत् राशिमपास्य शिष्टं ज्ञानरथैर्विभजेत् । लब्धा दृष्टिस्स्यात् । उक्तं च श्रीपतिना—

दृश्यो द्रष्ट्रा विरहिततनुः षड्ग्रहेभ्योऽधिकश्चेत्
दिग्भ्यश्शोध्यो विहितकलिकः खाभ्रपक्षाद्विभक्तः ।
दृष्टिस्सा स्याद्यदि शरगृहेभ्योऽधिकः पञ्चहीनो
लिप्तीभूतो धृतिशतहृतस्स्याच्चतुर्भाधिकश्चेत् ॥
त्यक्त्वेषुभ्यः खखरसगुणैर्वह्निभेभ्योऽधिकश्चेत्
शोध्योऽब्धिभ्यः तदनुकलितष्षष्टिकृत्यासमेतः ।
भक्तो द्व्यश्वैश्शतविनिहतैः राशियुग्माधिकोऽपि
द्वाभ्यामूनो नवशतयुतः षष्टिकृत्यासमेतः [1]
एकोनितश्चैकगृहाधिकश्चेत्
कलीकृतो द्व्यश्वशतैर्विभक्तः ।
एवं स्फुटाः खेचरदृष्टयस्स्यु-
र्द्विग्भ्योऽधिकां पश्यति न ग्रहेन्द्रः ॥ इति ।

यस्मादिह मन्दादीनां तृतीयदशमादिदृष्टिषु पादादिदृष्टय एवानीताः, तस्मात् तद्दृष्टिसामग्र्यापादनाय त्रिपादादिदृष्टयो [2]निधेयाः। तथा च श्रीपतिः—

त्रिद्व्येकपादाः क्रमशो(भि)निधेयाः शनैश्चराचार्यमहीसुतानाम् ।
त्रिकर्मणोर्धीसुतयोश्च रन्ध्रबन्ध्वोःस्थितानामिह पूर्वदृक्षु । इति ।

मन्दादीनां तृतीयदशमादिषु पादवृद्ध्योदितानीता दृष्टिरेव पूर्णा कार्येत्यन्ये । तथा च श्रीधरः—

दशमत्र्यादिके स्थाने पादवृद्ध्योदिता हि या ।
सूरसौरिकुजाः पूर्णां दृष्टिं कुर्वन्ति तां क्रमात् ॥ इति ।

यथा त्रिदशादिस्थानेषु सामान्येनोदिताः पादादिदृष्टयः कचि-त्प्रदेशे युक्ता व्यवस्थापिताः, एवं त्रिदशादिस्थानेषु सामान्येनोदि-

[1] विभक्तः. [2] अभिधेयाः.

तास्त्रिपादादिक्षेप्यदृष्टयोऽपि तदनुसारेण व्यवस्थापनीया इत्यन्ये, तथा च सूर्यदेवः—

यथा दशमस्थानस्योक्ता पाददृष्टिः दृष्टिशून्यं दशमराश्यन्तमुपक्रम्य प्रातिलोम्येन दशमादौ भवति । तथा तत्स्थानस्योदिता त्रिपाददृष्टिरपि दृष्टिशून्यदशमराश्यन्तात् क्रमेण दशमादौ भवितुमर्हति । एवं पञ्चमदशमादौ गणितानीता पाददृष्टिरपि पूर्णा भवतीति । एवं त्रयः पक्षाः । तेषु श्रीपतिमतं तदुक्तवदानीताया दृष्टेः रूपाधिक्यस्यापि क्वचित्संभवान्न साधु । नापि श्रीधरमतम्, तदुक्तवदानीतानां त्रिदशादिस्थानेषु सामान्येनोदितानां पूर्णदृष्टीनां राश्यादिमध्यान्तेषु सामान्यदर्शनात् । सप्तमस्थाने तु सर्वेषां सामान्येनोदितायाः पूर्णदृष्टेः राश्यादिमध्यान्तेषु वैषम्यदर्शनाच्च । सूर्यदेवमतं तु त्रिदशादिस्थानेषु त्रिपादादिक्षेप्यदृष्टिः फलराशिं राशिलिप्ताप्रमाणराशिं तत्तद्राश्यंतत्तत्स्थानग्रहान्तरलिप्ता इच्छाराशिं परिकल्प्य, त्रैराशिकेणानीतं गणितसिद्धपादादिदृष्टिषु क्षिपेत् । एवं च राश्यादिमध्यमान्तेषु साम्यं । रूपाधिक्यं च न स्यादिति युक्तं च नैतच्च सारं, एकस्मिन्नेव भागान्तरेऽतिवैषम्यदर्शनात् । तथाहि— मन्दस्य दशमराश्यारम्भे पूर्णा दृष्टिः । नवमराश्यन्ते पाददृष्टिरेवेत्येकस्मिन्नेव भागान्तरे महद्वैषम्यमापद्यते । यथा सप्तमनिबन्धना पूर्णा दृष्टिष्षष्ठभावमध्यमुपक्रम्य प्रवृत्ता क्रमेण वर्धमाना सप्तममध्ये पूर्णा भवति । ततस्तस्मादारभ्य क्रमेण क्षीयमाणाष्टममध्ये शून्या । एवं त्रिदशादिस्थाननिबन्धनाः पादादिदृष्टयोऽपि तत्पूर्वभावमध्यात् प्रवृत्ताः तत्त्रिभावमध्ये भवन्ति, तदुत्तरभावमध्ये शून्याश्च । तत्तदन्तराळे गणितेन पूर्वोत्तरदृष्ट्यनुसारेण दृष्टयो व्यवस्थापिताः । एवं

त्रिपादादिक्षेप्यदृष्टयोऽपि तत्प्राग्भावमध्यात्प्रवृत्ताः त्रिदशादिभावमध्ये पूर्णाः तदूर्ध्वभावमध्येऽवसिता यथा स्युस्तदनुसारेण निधेयाः । इहापि त्रिपादादिदृक्क्षेप्यदृष्टिं फलराशिं राशिलिप्ताप्रमाणराशिं तत्तद्भाव-मध्यतत्तत्स्थदृश्यग्रहान्तरलिप्ता इच्छाराशिं परिकल्प्य त्रैराशिके-नाप्तं क्षेप्यदृष्टिषु विशोध्य शिष्टं गणितानीतदृष्टिषु क्षिपेदित्येषा सुगमा युक्तियुक्ता च दृष्टिः । ननु द्वितीयषष्ठयोर्दृष्ट्यभावः कैश्चिदुक्तः, श्रीपत्यादिभिस्तयोर्युक्त्या दृष्टिर्व्यवस्थापितेति विरुद्धं, न, श्रीपत्यादिभि-र्द्रष्टारं दृश्याद्विशोध्य तत्केन्द्रराशिभिर्दृष्टिर्व्यवस्थापिता । पूर्वैर्दृष्टा-क्रान्तराशिप्रदेशं भावमध्ये कृत्वा तद्भावमध्ययोः दृष्ट्यभाव उक्तः । इति ॥ ग्रहाणां मित्रामित्रभावमाह—

ज्ञेया जीवकुजेन्दवो रविबुधौ गुर्वर्कशीतांशवः शुक्रार्कौ कुजविध्विनाः शनिबुधौ शुक्रेन्दुजौ च क्रमात् । अर्कादेस्सुहृदस्समास्तु शशिजः सर्वे च काव्यार्कजौ मन्दाचार्यकुजाश्शनिर्गुरुकुजौ जीवः परे शत्रवः ॥ २८ ॥

जीवकुजेन्दव इत्यादिपदक्रमेण कथिताः सूर्यादीनां सुहृदः मित्राणि भवन्ति । अथ शशिज इत्यादिपदक्रमादुक्ताः समाः उदासीनाः । सर्व इति । रविबुधयोर्मित्रत्वात् तदन्ये—कुजगुरुशुक्रमन्दा इत्युच्यन्ते । परे मित्रेभ्यस्समेभ्यश्चान्ये शत्रवो भवन्ति । एतदुक्तं भवति बृहज्जातके—

शत्रू मन्दसितौ समश्शशिसुतो मित्राणि शेषा रवेः
तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषास्समाश्शीतगोः ।

जीवेन्दूष्णकराः कुजस्य सुहृदो ज्ञोऽरिस्सितार्की समौ
मित्रे सूर्यसितौ बुधस्य हिमगुश्शत्रुस्समाश्चापरे ।
सूरेस्सौम्यसितावरी रविसुतो मध्योऽपरे त्वन्यथा
सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी ।
शुक्रज्ञौ सुहृदौ समस्सुरगुरुः सौरस्य चान्येऽरयो
ये प्रोक्तास्सुदस्त्रिकोणभवनात्तेऽमी मया कीर्तिताः ।

इतीदं सत्यमतम् । यवनमते शत्रुमित्रे द्वे एव निसर्गजौ, न समः । तथा च तत्रैव—

जीवो जीवबुधौ सितेन्दुतनयौ व्यर्का विभूजाः क्रमा-
दिन्द्वर्कादिकुजेन्द्विनाश्च सुहृदः केषांचिदेवं मतम् ।
सत्योक्ते सुहृदस्त्रिकोणभवनात् स्वात् स्वान्त्यधीधर्मपाः
स्वोच्चायुस्सुखपाश्च लक्षणविधेर्नान्ये विरोधादिति ।

इह यवनमतात्सत्यमतस्य साधुत्वापादनायायं लक्षणविधिः । तथाहि—ग्रहस्य स्वत्रिकोणराशेः द्विचतुःपञ्चाष्टनवद्वादशसङ्ख्य-राशीनां स्वोच्चराशेश्चाधिपत्यकृता मित्रता । तस्मात् तृतीयषष्ठ-सप्तमदशमैकादशराश्याधिपत्यकृता शत्रुता । ग्रहास्तु मित्रत्वयोगात् मित्राणि, शत्रुत्वयोगात् शत्रवः, उभययोगान्मध्या भवन्ति । सूर्य-सोमौ स्वाम्यद्वयाभावात् मित्रे शत्रू वा स्तः, न समाविति लक्षणासिद्धत्वात् अनेकाचार्याभिमतत्वाच्च सत्यमतमेव श्रेयः, न यवनेश्वरमतमिति तद्-नादृत्य सत्यमतमाश्रितमाचार्येण । लोकेऽपि शत्रवोऽपि कदाचिन्मित्री भवन्ति, मित्राण्यपि शत्रूभवन्ति, ग्रहा अपि तद्वदिति ॥

तात्कालिकशत्रुमित्रतामाह—

मेषूरणाम्बुसहजायधनव्ययेषु

यो यस्य तिष्ठति स तस्य सुहृत्तदानीम् ।
अन्येषु वैर्युभयथारिसुहृत्त्वयोगात्
ज्ञेयो ग्रहोऽधिसुहृदध्यसुहृत्समश्च ॥

यस्य ग्रहस्य दशमतुरीयतृतीयैकादशद्वितीयद्वादशेषु यस्तिष्ठति स तत्स्थो ग्रहस्तस्याबाधिभूतस्य ग्रहस्य तदानीं तत्काले मित्रं भवति । अन्येषु दशमादिभ्यतिरिक्तेषु प्रथमसप्तमपञ्चमनवमषष्ठाष्टमेषु स्थितः तत्काले शत्रुर्भवति । तथा तत्स्थग्रहस्य सोऽपि मित्रं शत्रुश्च स्यात् । तावुभावन्योन्यमित्रे अन्योन्यशत्रू च स्तः इत्यर्थः । उभयथा—नैसर्गिकेण तात्कालिकेन च । अरिश्च सुहृच्च अरिसुहृदौ । तयोर्भावोऽरिसुहृत्त्वं, तद्योगात् अरिसुहृत्त्वयोगाच्च हेतोरित्यर्थः । स ग्रहोऽधिसुहृदध्यसुहृत् समश्च ज्ञेयः । चकारस्समुच्चयार्थः । तौ सुहृन् असुहृच्चेति । एतदुक्तं भवति—यो यस्य नैसर्गिकस्सुहृत्, स तात्कालिकसुहृत्त्वयोगादधिसुहृन् भवति, तात्कालिकारित्वयोगात् समः, यो नैसर्गिकश्शत्रुः स तात्कालिकारित्वयोगादधिशत्रुः, तात्कालिकसुहृत्वयोगात्समः । यो नैसर्गिकस्समः, स तात्कालिकसुहृत्त्वयोगात् सुहृन्, तात्कालिकारित्वयोगादरिश्च भवति । तथाच वराहमिहिरः—

अन्योन्यस्य धनव्ययायसहजव्यापारबन्धुस्थिता-
स्तत्काले सुहृदस्स्वतुङ्गभवनेऽप्येकेऽरयस्त्वन्यथा ।
द्व्येकानुक्तभपान् सुहृत्समरिपून् सञ्चिन्त्य नैसर्गिकान्
तत्काले च पुनस्तु तानधिसुहृन्मित्रादिभिः कल्पयेत् ॥ इति ।

यो यस्य स्वोच्चराशौ तिष्ठति, स तस्य तात्कालिकमित्रमित्येतदाचार्येण युक्तव्ययुक्तमिति नोक्तम् । यस्मादुच्चस्थस्य मित्रत्वे नीचस्थेन शत्रुणा भाव्यमिति ॥

कालहोराधिपानाह—

दिनद्वादशांशो मतः कालहोरा
पतिस्तस्य पूर्वस्य वाराधिनाथः ।
ततष्षष्ठषष्ठाः क्रमेणेतरेषां
निशायां तु वारेश्वरात्पञ्चमाद्याः ॥ २० ॥

दिनस्य—स्फुटदिनप्रमाणस्य द्वादशांशः—किञ्चिदूनाधिकसार्धद्विघटिकात्मकः कालहोरासंज्ञः। तस्य तद्वारेशः पतिः, ततो द्वितीयस्य वारेशात् षष्ठः, तृतीयस्य तस्मात् षष्ठः पूर्वस्मात् यश्चतुर्थो भवति । एवमन्येषामपि तत्तत्षष्ठास्स्वामिनस्स्युः । एवं निशायामपि द्वादशकालहोरासंज्ञाः । तत्राद्यस्य वारेशात् पञ्चमः पतिः । द्वितीयादीनां वारेशपञ्चमात् षष्ठषष्ठाः पतयस्स्युः, प्रतिदिनं चतुर्विंशतिकालहोरास्तासां वाराधिपाद्याः यथोत्तरं सप्तैव पौनःपुन्येनावृत्ताः पतयो भवन्ति ।

यथोक्तमार्यभटेन—

सप्तैते होरेशाश्शनैश्चराद्या यथाक्रमं शीघ्राः ।
शीघ्रक्रमाच्चतुर्थाः भवन्ति सूर्योदयाद्दिनपाः ॥ इति ।

शनैश्चराद्या इति शनैश्चरगुरुभौमार्कशुक्रबुधचन्द्रा उच्यन्ते । अत्र केचिदाहुः—दिनस्यैव चरवशात् ह्रासवृद्धी स्तः, तदनुसारेण कालहोराणामिति । तथाच श्रीपतिः—

वारप्रवृत्ता घटिका द्विनिघ्नाः
कालस्य होरापतयश्शराप्ताः ।
वाराधिपाद्या रविशुक्रसौम्य-
शशाङ्कसौरेज्यकुजाः क्रमेण । इति ।

कालहोरास्सार्धद्विघटीरूपा नियमिताः । तथाच भरद्वाजः—

यावन्नाडीद्वयं सार्धं कालहोरेति चोच्यते ।
अहोरात्रे चतुर्विंशद्धोरास्तास्स्युस्समा इति ॥

अन्ये तु दिनवत् कालहोराणामपि चरवशात् ह्रासवृद्धी वाञ्छन्ति । तथाच सर्वसिन्धौ—

यमकण्टकहोरार्द्धप्रहारगुळिकादयः ।
दिनरात्रिस्पृशो नाड्यः तद्गुणास्त्रिंशता हृताः ॥ इति

तद्गुणाः—स्फुटदिनगुणिता इत्यर्थः । एतदेव सारं, यस्मादुक्तं—

प्रातर्दिनपतेर्गण्यास्सायं तत्पञ्चमादितः। इति । तथाहि—कालहोराणां सार्धद्विघटीरूपत्वे नियते यदा त्रिंशद्घटीमितं दिनं तदा रात्रौ प्रथमहोराया वारेशपञ्चमः पतिस्स्यात् । यदा तु सार्धसप्तविंशतिघटिकात्मकं तदा वारेशसप्तमः पतिः प्राप्नोति । यदा सार्धद्वात्रिंशद्घटिकात्मकं तदा वारेशतृतीय इति । अथ होराणां दिनद्वादशांशप्रमाणत्वे सर्वदा शर्वरीपूर्वहोराया वारेशपञ्चम एव पतिर्भवति । कालहोरास्त्वनियतमानाः सार्धद्विघटीरूपाः तदूनाधिका वा स्युः । तस्मात् दिनद्वादशांशः कालहोरेत्येतदेवानेकाचार्याभिमतमाचार्येणोक्तम् । तुशब्दो मतान्तरद्योतनार्थः । दिवापि वारेश्वरात्पञ्चमाद्या होरापतय इति । तथा चोक्तमत्रिणा—

गुर्वारार्कभृगुज्ञेन्दुमन्दा अर्कादिवारतः।
चतुर्विंशांशपा वारमन्त्यं वारेशितुः क्रमात् ॥ इति

अथ नक्षत्रसंज्ञामाह—

नक्षत्राणां नामान्यश्विन्यादीनि लोकसिद्धानि।
निजदेवताभिधानैरभिधास्यन्ते क्वचिच्च तान्यत्र ॥

नक्षत्राणि सप्तविंशतिः, तेषां नामान्यश्विन्यादीनि । अश्विनी भरणी कृत्तिकेत्यादीनि लोकसिद्धानि । अतस्तानि नेहाभिधीयन्ते इति शेषः । अत्र शास्त्रे तानि क्वचिन्नक्षत्रनिर्देशे कार्ये श्राव्यवृत्तग्रथनाय निजदेवताभिधानैः–निजनामभिः–अश्विनीत्यादिभिः, स्वदेवतानामभिः अश्विनावित्यादिभिर्वा, स्वदेवताकृतनामभिः 'सास्य देवता' इत्यर्थे तद्धितप्रत्ययान्तैर्नामभिराश्विनमित्यादिभिर्वा वक्ष्यन्ते ॥

नक्षत्राणां देवता आह—

भानामश्वियमाग्निधातृशशिनो रुद्रोऽदितिर्गी-ष्पतिः स्सर्पौघाः पितरोऽर्यमा भगरवी त्वष्टाऽऽशु-गेन्द्राग्नयः । मित्रेन्द्रौ निरृतिः पयोदकुसुमं विश्वे मुकुन्दो वसुक्षीरेशावज एकपात् पुनरहिर्बुध्नयश्च पूषाधिपाः ॥ ३२ ॥

अश्विन्यादीनां भानामश्व्यादयस्सप्तविंशतिर्दैवताः अधिपास्स्युः । अश्विन्या अश्विनौ देवता, भरण्या यम इत्यादि । धाता—प्रजापतिः । आदितिः—देवमाता, गीष्पतिः—बृहस्पतिः । सर्पौघाः—सर्पश्रेष्ठाः । अर्यमभगौ द्वौ देवौ । त्वष्टा—देवशिल्पिः । आशुगो—वायुः । विशाखानक्षत्रस्येन्द्राग्नी द्वौ देवता । तथाच श्रूयते—विशाखे नक्षत्रं इन्द्राग्नी द्वौ देवता इति । मित्रो देवः । पयोदकुसुमं जलम् । विश्वे—विश्वदेवाः । मुकुन्दो—विष्णुः । वसवोऽष्टौ देवाः । क्षीरेशो वरुणः, अज एकपात्—अजैकपान्नाम देवः । अहिर्बुध्नयो देवः । केचित् पूर्वोत्तरफल्गुन्योः देवताविनिमयमामनन्ति । तथा च रल्लः—

अश्वी यमदहनकमलजशशिशूलभृदादितिजीवफणिपितरः ।
सभगोऽर्यमा दिनकरस्त्वष्टा पवनश्च शक्राग्नी ।
मित्रश्शक्रो निरृतिस्तोयं विश्वे हरिर्वसुर्वरुणः ।
अजपादोऽहिर्बुध्न्यः पूषा चेतीश्वरा भानाम् । इति ॥

तदनादरणीयं, अश्रौतत्वात् । श्रुतिविरोधे अस्य ज्योतिश्शास्त्रस्य श्रुत्यङ्गत्वमेव नोपपद्येत । आचार्योक्तमेव श्रौतम् । तथा च श्रूयते—

'फल्गुनी नक्षत्रमर्यमा देवता, फल्गुनी नक्षत्रं भगो देवता'
इति । तस्मादत्रोक्तमेव साधीय इति ।

केषांचिद्भानां संज्ञान्तरमाह—

पूर्वा फल्गुन्यषाढाश्च पूर्वाः प्रोष्ठपदा अपि ।
पूर्वात्रयं विदुस्तस्मादुत्तरं चोत्तरात्रयम् ॥ ३३ ॥

फल्गुनीसंज्ञे आषाढासंज्ञे प्रोष्ठपदासंज्ञे च द्वे द्वे नक्षत्रे स्तः । तत्र पूर्वं नक्षत्र त्रयं पूर्वात्रयं विदुः । पूर्वत्रयादुत्तरं यन्नक्षत्रत्रयं तदुत्तरात्रयं विदुः ॥

शूर्पद्विदैवसंज्ञा विशाखयोरदितिभस्य मात्राख्या । प्रोष्ठपदाद्वितयस्य क्रमशस्स्यात् भाद्रबुध्नयसंज्ञानम् ॥ ३४ ॥

विशाखयोः-विशाखाक्षत्रस्य शूर्पं द्विदैवमिति संज्ञाद्वयं स्यात् । अदितिभस्य—पुनर्वसुनक्षत्रस्य मातृसंज्ञा । प्रोष्ठपदाद्वयस्य क्रमशो भाद्रबुध्नच संज्ञा स्यात् । पूर्वप्रोष्ठपदानक्षत्रस्य भाद्रमिति उत्तरप्रोष्ठपदानक्षत्रस्य बुध्नयमिति संज्ञे स्त इत्यर्थः ॥

नक्षत्रनिर्देशे लाघवायाह—

यन्नक्षत्रोपपदा यावत्यभिधीयते पुरासंख्या ।
भानामिह सा संख्या विज्ञेया तावतां तदादीनाम् ॥

यन्नक्षत्रमुपपदं कृत्वा यावती—द्वित्र्यादिका संख्या पुराभिधीयते—अभिधास्यत इत्यर्थः । 'यावत्पुरानिपातयोर्लट्' इति भविष्यति लट् । सा नक्षत्रोपपदा संख्या तदुपपदीकृत्य नक्षत्रादीनां भानां तावतामपि व्यापिनी विज्ञेया । नक्षत्रोपपदवत्संख्यानिर्देशे तदुपपदीभूतनक्षत्रप्रभृतीनि तावत्संख्यानि भानि ग्राह्याणीत्यर्थः । यथा-चित्राद्वयमित्युक्ते चित्रास्वात्यौ नक्षत्रे गृह्येते । श्रवणत्रयमित्युक्ते श्रवणधनिष्ठाशतभिषजो नक्षत्राणि त्रीणि गृह्यन्ते इत्याद्यूह्यम् ।

नक्षत्राणां कृत्यविशेषाभिधानाय विभागसंज्ञामाह—

तिष्यो वैष्णवमुत्तरात्रयवसुप्राचेतसं रुद्रभं
रोहिण्या युतमेतदृक्षनवकं विज्ञेयमूर्ध्वाननम् ।
मैत्राश्विन्यदितीन्दुपौष्णपवनत्वष्ट्रर्कदेवेन्द्रभं
तिर्यग्वक्त्रमधोमुखं तदपरं तत्तत्समं तत्फलम् ॥

तिष्यः-पुष्यः । वैष्णवं—श्रवणं । वसुः—धनिष्ठा । प्राचेतसं—शतभिषं । रुद्रभं—आर्द्रा । एतत्पुष्यादिनक्षत्रनवकमूर्ध्वमुखसंज्ञम् । मैत्रं—अनूराधा । इन्दुः—मृगशिरः । पौष्णं—रेवती । पवनः—स्वाती । अर्कोहस्तः । देवेन्द्रभं—ज्येष्ठा । एतानि भानि, समाहारैकवद्भावः । अनूराधादीदं भनवकं तिर्यङ्मुखसंज्ञम् । ताभ्यामपरं ऊर्ध्वमुखतिर्यङ्मुखव्यतिरिक्तनक्षत्रनवकमधोमुखसंज्ञम् । भरणीकृत्तिकाऽऽश्ले-

षामघामूलविशाखापूर्वात्रयाणीति । तत्फलं—तन्नक्षत्रनवकत्रयकृत्यं तत्तत्समं—तस्यतस्य संज्ञासदृशमित्यर्थः । तथाच श्रीपतिः—

तिष्यार्द्राश्रवणोत्तराशतभिषग्ब्रह्मश्रविष्ठाह्वया-
न्यूर्ध्वास्यानि नवोदितानि मुनिभिर्धिष्ण्यान्यथैतेषु तु ।
प्रासादध्वजहर्म्यवारणगृहप्राकारस्वक्तोरण-
च्छायारामविधिर्हितो नरपतेः पट्टाभिषेकादि च ॥
ज्येष्ठादित्यकराश्विनीमृगशिरःपौष्णोऽनुराधानिल-
त्वाष्ट्राख्यानि वदन्ति भानि मुनयस्तिर्यङ्मुखान्येषु तु ।
अश्वेभोष्ट्रलुलायरासभवृषारभ्रादिदन्तिश्वनौगन्त्री-
यन्त्रहलप्रवाहगमनारम्भाः प्रसिद्ध्यन्ति च । इति ।

क्षिप्रास्तीक्ष्णकराश्विनेयगुरवो वस्वम्बुनाथानि-लश्रीनाथादितयश्चराश्च मृदवश्चित्रान्त्यमित्रेन्दवः । उग्रा भाद्रयमार्यमाम्बुपितरो ज्ञेया बुधैरुत्तरारोहिण्यस्स्थिरसंज्ञितास्तदपरास्तीक्ष्णाह्वयास्तारकाः ॥ ३६ ॥

तीक्ष्णकराश्विनेयगुरवः—हस्ताश्विनीपुष्यास्त्रयः क्षिप्रसंज्ञाः । धनिष्ठाशतभिषक्स्वातीश्रवणपुनर्वस्वः पञ्चर्क्षाणि चरसंज्ञानि । चित्रारेवत्यनूराधामृगशीर्षाणि चत्वारि मृदुसंज्ञानि । भाद्रं—पूर्वाभाद्रा, यमो—भरणी अर्यमा, फल्गुनी—पूर्वाफल्गुनी, अम्बु—पूर्वाषाढं पितरो—मघाः एतानि पञ्च भानि उग्रसंज्ञानि । उत्तरात्रयरोहिण्यश्चतस्रस्तारास्स्थिरसंज्ञाः । तदपराः आर्द्राऽऽश्लेषामूलज्येष्ठाविशाखाकृत्तिकाः षट् तारकाः तीक्ष्णाख्याः । अन्ये विशाखाकृत्तिकयो-

मृदुतीक्ष्णविमिश्राख्यामाहुः । तथाच रत्नः—

हौतवहं साविशाखं मृदु तीक्ष्णं तद्विमिश्रफलकारि । इति ।

अत्रापि तत्तत्समं तत्फलमित्यनुवर्तते ।

उक्तं च रत्नेन—

लघुहस्ताश्विनपुष्याः पण्यरतिज्ञानभूषणकलासु ।
शिल्पौषधयानेषु च सिद्धिकराणि प्रदिष्टानि ।
श्रवणत्रयमादित्यानिलेषु चरकर्मणि हितानि ।
मृदुवर्गोऽनूराधाचित्रापौष्णैन्दवानि मित्रार्थे ।
सुरतविधिवस्त्रभूषणमङ्गळगीतेषु च हितानि ।
उग्राणि पूर्वभरणीपित्र्याण्युत्सादनादिसाध्येषु ।
योज्यानि बन्धविषदहनशस्त्रघातादिषु च सिद्ध्यै ।
त्रीण्युत्तराणि रोहिण्या सह ध्रुवाणि तैः कुर्यात् ।
अभिषेकशान्तितरुनगरधर्मबीजध्रुवारम्भान् ।
मूलशिवशक्रभुजगाधिपानि तीक्ष्णानि तेषु सिद्ध्यन्ति ।
अभिघातमन्त्रवेताळबन्धवधभेदसंबन्धाः ॥ इति ।

अश्विन्यार्याजभाद्रद्वयरविमुरजिन्मातृमित्राः पुमांसः क्लीबाख्या मूलशीतद्युतिजलपतयस्तारका योषितोऽन्याः । देवर्क्षाणीन्दुजीवादितितपनमरुत्पौष्णविष्णवश्विमित्रामर्त्याः पूर्वोत्तरेशान्तककमलभुवश्शिष्टभान्यासुराणि ॥ ३७ ॥

आर्यो—जीवः । अजो—ब्रह्मा । भाद्रद्वयं—प्रोष्ठपदाद्वयम् । मुरजित्—विष्णुः । अश्विन्यादीनि पुंसंज्ञानि । मूलमृगशिरश्शत-

भिषजस्त्रयः क्लीबाख्याः । अन्याः—भरणीकृत्तिकाऽऽश्लेषामघात्रय-चित्रात्रयज्येष्ठाश्रविष्ठाषाढाद्वयरेवत्यः पञ्चदश तारकाः योषित्संज्ञाः । तपनः—सूर्यः । मरुत्—वायुः । मृगशीर्षादीनि नवर्क्षाणि देवसंज्ञानि । पूर्वाः—पूर्वात्रयं । उत्तरात्रयं, कमलभूः—ब्रह्मा । पूर्वादयो नव ताराः मर्त्यसंज्ञाः । शिष्टानि । कृत्तिकाऽऽश्लेषामघामूलविशाखाचित्राज्येष्ठाश्रविष्ठाशतभिषग्भानि नवासुराणि राक्षससंज्ञानि । एतद्द्वयं सेवापरिणयादावुपयुज्यते ।

आग्नेयादीन्यत्र चत्वार्युडूनि
प्राज्ञैरुक्तान्यन्तरङ्गाभिधानि ।
मात्रादीनि त्रीणि बाह्याह्वयानि
ज्ञेयान्यैवं सप्तसप्तेतराणि ॥ ३८ ॥

आग्नेयादीनि—कृत्तिकादिचत्वार्युडूनि अन्तरङ्गाख्यानि । ततः पुनर्वस्वादीनि त्रीणि भानि बाह्याख्यानि । इतराणि मखादीनि सप्त, मैत्रादीनि साभिजन्ति सप्त, धनिष्ठादीनि सप्त भान्येवं चत्वार्यन्तरङ्गानि त्रीणि बाह्यानि ज्ञेयानीत्यर्थः । तत्कृत्यं च वक्ष्यति ।

यदात्मनीनं शुभमन्तरङ्गे
तद्वेऽपि दद्यादशुभं तु बाह्ये । इति ।

नक्षत्रमृक्षं भं तारातारकाप्युडु वाऽस्त्रियामित्यमरः ।

अथ तिथिसंज्ञामाह—

नन्दा च भद्रा विजया च रिक्ता
पूर्णेति संज्ञाः क्रमशस्तिथीनाम् ।

छिद्राभिधास्तासु भवन्ति भास्व-
द्दस्वङ्गसंङ्ख्यास्थितयस्सरिक्ताः ॥ ३१ ॥

प्रथमादिपञ्चदश्यन्तानां तिथीनां नन्दादयः पञ्च संज्ञाः क्रमशः पर्यायेण त्रिरावृत्ता भवन्ति, प्रतिपत्षष्ठ्येकादशीनां नन्दादिसंज्ञेत्यादि । एषा चान्वर्थसंज्ञा विज्ञायते यथाह रल्लः—

नन्दा भद्रा विजया रिक्ता पूर्णास्स्वनामसदृशफलाः । इति ।

कैश्चिदन्यथा प्रथमादितिथिसंज्ञाः कथिताः तथा च रल्लः—

वृद्धिः समङ्गलाख्या बलाबला श्रीमती च शामित्रा ।
सुमहामहोग्रकर्मा सुधर्मिणी चाप्यथो नन्दा ।
परतो यशोवती स्यात् जया तथोग्रा च सौम्यसंज्ञा च ।
तिथिनामानि क्रमशः *फलसंज्ञानुरूपाणि । इति ।

चकारोऽनुक्तसमुच्चयार्थः । तेन तिथीनां देवता इहानुपयुक्ता इत्यनुक्ता अपि शास्त्रान्तरादवगन्तव्याः । उक्तं च रल्लेन—

'हुतवहकमलजगिरिजागजवदनभुजङ्गगुरुदिनेशशिवाः ।
दुर्गायमविश्वाच्युतमदनेश्वरशशिभृतः पुरा प्रोक्ताः
पितरोऽमावास्यायाः' इति ।

तासु भास्वद्दस्वङ्गसंख्याः—द्वादश्यष्टमीषष्ठ्यः रिक्ताभिश्चतुर्थीनवमीचतुर्दशीभिस्सह छिद्राभिधा भवन्ति ।

दर्शस्यापि छिद्रत्वं कैश्चिदुक्तम् । तथाच—

छिद्राणि युग्मास्तिथयः सदर्शाः पक्षस्य हित्वा दशमी द्वितीये ।
तत्रायुजश्श्रेष्ठतमाः प्रदिष्टाः विना नवम्या परमार्थविद्भिः' इति ।

---

*स्युः फलसंज्ञानुरूपाणि इति स्यात्.

एतासु तिथिष्वपि स्थिरादिभेदाः कैश्चिदुक्ताः । तथाच भरद्वाजः—

स्थैर्ये तु प्रतिपच्छ्रेष्ठा दशम्येकादशी तथा ।
द्वितीया सप्तमी चैव द्वादशी क्षिप्रकर्मसु ।
त्रयोदशी तृतीया च पञ्चमी च मृदौ शुभाः ।
अष्टमी चैव षष्ठी च पूजिते मृदुदारुणे ।
चतुर्दशी चतुर्थी च नवमी क्रूरदारणे ॥
तेषु च व्यतिरिक्तत्वात् सर्वारम्भं विवर्जयेत् ।
पौर्णमासी शुभा पुण्या पूजिता शुभकर्मसु ।
अमावास्या निरारम्भा सर्वारम्भेषु वर्जिता ॥

इति । करणान्याह—

बवबालवकौलवतैतिलगरजवणिजविष्टिनामानि । चरकरणानि विदुश्शुक्लप्रथमान्त्यार्धपूर्वाणि ॥४१॥

तिथिं द्विधा करोतीति करणमित्यन्वर्थसंज्ञानात् तिथ्यर्धं करणमिति विज्ञायते । तानि बवादिसंज्ञानि करणानि सप्त चराणि शुक्लप्रथमान्त्यार्धादारभ्य आ कृष्णचतुर्दश्यपरार्धान्मासेऽष्टकृत्वः पर्यायेण भवन्ति । शुक्लप्रतिपदपरार्धादीनि तिथ्यर्धानि सप्त सप्त बवादिसंज्ञानि करणानीत्यर्थः ।

स्थिरकरणान्यसितचतुर्दश्यपरार्धादिकानि चत्वारि । प्राहुश्शकुनिचतुष्पदसनागकिंस्तुघ्ननामानि ॥ ४२ ॥

कृष्णचतुर्दश्यपरार्धादीनि शुक्लप्रतिपत्पूर्वार्धान्तानि तिथ्यर्धानि शकुन्यादिसंज्ञानि चत्वारि स्थिरकरणानि भवन्ति । उक्तं च ब्रह्मगुप्तेन—

कृष्णचतुर्दश्यन्ते शकुनिः पर्वणि चतुष्पदः प्रथमे ।
तस्यान्त्यार्धे नागः किंस्तुघ्नः प्रतिपदाद्यर्धे ॥

तथाच भरद्वाजः—

तिथिं तु द्विगुणं कृत्वाप्येकमेव युतं क्रमात् ।
शुक्ले च बहुले सर्वे सप्त शेषा बवादयः ॥

करणयोनीराह वृत्तार्धेन—

तेषां सिंहव्याघ्रकोलाः खरेभौ
गौश्श्वा चेत्थं योनयस्संप्रदिष्टाः ॥ ४३ ॥

कोलः वराहः । खरः गर्दभः । इभः गजः । शेषाः प्रसिद्धाः । तेषां बवादीनामिति सिंहादयस्सप्त योनयः ता एव संज्ञाश्चोक्ताः । यथा बवस्य सिंहो योनिः सैव संज्ञा चेत्यादि । इत्थंशब्दोऽनुक्तदेवतानामध्याहारार्थो वा । ताश्चोक्ता भरद्वाजेन—

विष्णुः प्रजापतिश्चन्द्रः सुरेज्यो वसवस्तथा ।
माणिभद्रो यमश्चेति दवतानि बवादि यत् ॥ इति ॥

शकुनादीनां पक्षिपशुसर्प (?) योनयः । तेनैव देवताश्चोक्ताः—

मृत्युश्च पितरो नागा रुद्रश्चेति यथाक्रमम् ।
देवताश्शकुनादीनां चतुर्णां समुदाहृताः ॥ इति ॥

अथ सूर्यादिवाराः प्रसिद्धाः तेषां योनीश्चाह वृत्तापरार्धेन—

शुक्रेन्द्वार्यब्रध्नसौम्यार्कसूनु-
क्ष्मापुत्राणां वासराणां च सद्भिः ॥४३॥

ब्रध्नः सूर्यः, सौम्यो बुधः। शुक्रादिवासराणामपि सिंहादयस्सप्त योनयो भवन्तीति सद्भिरुक्ताः। यथा शुक्रवारस्य सिंहः। इन्दुवारस्य व्याघ्रः इत्यादि। चकारोऽनुक्तसमुच्चयार्थः।

वारदेवताश्च—

सूर्यादितश्शिवशिवागुहविष्णुकेन्द्र-
कालाः क्रमेण पतयः कथिता ग्रहाणाम्।
वह्न्यम्बुभूमिहरिशक्रशचीविरिञ्चा-
स्तेषां पुनर्मुनिवरैः प्रतिदेवताश्च।

पञ्चाङ्गादीन्याह—

नक्षत्रवारतिथयः करणानि योगाः पञ्चाङ्गमेतदथ राशियुतं षडङ्गम्। सप्ताङ्गमित्यभिहितं ग्रहयुक्तमेतत् वर्गोत्तमो निजनिजो भवने नवांशः॥४४

नक्षत्रं—चन्द्रस्य एकनक्षत्रभोगकालः। तथा च भरद्वाजः—

यद्यन्नक्षत्रमासाद्य शशी यावत्तु तिष्ठति।
तावत्तन्नामसंयुक्तं नक्षत्रमिति चक्षते॥ इति।

वारः सूर्योदयद्वयमध्यकालः। तथा च श्रीपतिः—

वारप्रवृत्तिं मुनयो वदन्ति सूर्योदयाद्रावणराजधान्याम्।
ऊर्ध्वं तथाधोऽप्यपरत्र तस्मात् चरार्धदेशान्तरनाडिकाभिः॥

इति। तिथिः—चन्द्रस्य बिम्बपञ्चदशांशवृद्धिक्षयकालः। तथा च भरद्वाजः—

यदा पञ्चदशो भागो वर्धते क्षीयतेऽपि वा ॥
कालेन यावता चन्द्रः स कालस्तिथिरुच्यते ॥ इति ।

करणं—तिथ्यर्धकालः ।

तिथिः द्वे करणे ज्ञेये . . . . ।

इति भरद्वाजः । योगो—नित्यो विष्कम्भादिः । स चार्केन्द्वो श्चक्रान्तमुपक्रम्योभयोरप्येकनक्षत्रभोगकालः । एतत्पञ्चकमेकोक्तौ पञ्चाङ्गमित्युच्यते । राशयो मेषाद्याः, तैस्सह एकोक्तौ षडङ्गमिति एतत्षडङ्गमेव ग्रहैश्च सहैकोक्तौ सप्ताङ्गमित्युक्तम् । परिशिष्टपादेन वर्गोत्तमांशानाह । राशिषु निजनिजो नवांशो वर्गोत्तमसंज्ञः । स च चरादिषु प्रथममध्यमान्तगतः । तथा च वराहमिहिरः—

वर्गोत्तमाश्चरगृहादिषु पूर्वमध्य-
पर्यन्ततः स शुभदा नव भागसंज्ञाः ॥ इति ।

कन्याहयार्धयमतौलिघटा द्विपाद-
स्तोयाश्रया झषकुळीरमृगान्त्यभागाः ।
पूर्वापरे मृगहयाङ्गदले मृगेन्द्रो
मेषो वृषश्च पशवश्चतुरङ्घ्रिसंज्ञाः ॥४५॥

हयार्धं—धनुःपूर्वार्धम् । कन्याद्याश्चत्वारो राशयः सराश्यर्धाः द्विपादः—नरराशय इत्यर्थः । मीनकर्किमकरापरार्धा जलचरराशयः । मकरस्य पूर्वमर्धं हयाङ्गस्यापरार्धमिति सद्विराश्यर्धाः सिंहाद्यास्त्रयः चतुष्पादसंज्ञाः । अस्यैव विवरणं पशव इति । परिशिष्टो वृश्चिक एकः कीटसंज्ञ इति शेषः । एतत्प्रयोजनं च बलाबलपरिज्ञानादि । अत्र गार्ग्यः—

नृयुक्तुला घटः कन्या पूर्वमर्धं च धन्विनः ।
लग्नस्था बलिनो ज्ञेया एते हि नरराशयः ।
चतुर्थे कर्कटे मीनो मकरार्धं च पश्चिमम् ।
विज्ञेया बलिनो नित्यमेते हि जलराशयः ।
चापान्त्यार्धाजगोसिंहा बलिनः खे चतुष्पदाः ।
सप्तमे वृश्चिकः कीटो बलवान् परिकीर्तितः ॥ इति ।

विप्राह्वयौ गुरुसितौ नृपती कुजार्कौ
वैश्यश्शशी शशिसुतो वृषलोऽर्कजोऽन्त्यः ।
वेदाधिपा गुरुसितारबुधा दिगीशाः
भास्वत्सितारफणिमन्दशशिज्ञजीवाः ॥ १६ ॥

वृषलः शूद्रः । अन्त्यः चण्डालः । एताः पञ्च जातयः । एतच्च प्रश्नादिषूपयुज्यते । गुर्वादयश्चत्वारो वेदानां ऋग्यजुस्सामाथर्वणां पतयः । ऋचां गुरुः । यजुषां सितः । साम्नां कुजः । अथर्वणां बुधः । भास्वदादयोऽष्ट ग्रहाः प्रागाद्यष्टदिशामीशा भवन्ति । यथा—प्राच्याः सूर्यः । आग्नेय्यास्सितः इत्यादि । केचित् राशिष्वपि जात्यादिभेदान्वदन्ति । तथा च वराहमिहिरः—

झषमेषवृषभमिथुनाः त्रिकोणसहितास्तु विप्राद्याः ।

इति । मीनकर्कटवृश्चिका विप्राः इत्यादि । मेषाद्यास्सत्रिकोणराशयः प्रागादिचतुर्दिशामीशास्स्युः ।

तथा च बृहज्जातके—

प्रागादीशाः क्रियवृषनृयुक्कर्कटास्सत्रिकोणाः ।

इति । अनयोर्यात्रोपनयनादिषूपयोगः ।

संज्ञामुपदिशति—

ज्ञेयाविन्दुकवी स्त्रियौ शनिबुधौ क्लीबौ पुमांसः परे संज्ञाः काश्चन पूर्वशास्त्रगदितास्संक्षेपतो दर्शिताः। अस्मिन् रूपवपुःप्रमाणसगुणद्रव्यस्वभावादयः कथ्यन्ते सगृहग्रहस्य न मया ह्यन्यत्र तद्विस्तरः ॥ ४७ ॥

चन्द्रशुक्रौ स्त्रीसंज्ञौ। शनिबुधौ नपुंसकसंज्ञौ। राहुश्च षण्ढः। परे रविकुजगुरवः पुमांसः। तथा च नारदः—

पुंग्रहास्सूर्यभौमार्याः स्त्रीग्रहौ शशिभार्गवौ।
नपुंसकौ शनिबुधौ शिरोमात्रं विधुन्तुदः ॥ इति।

एतस्याधानप्रश्नादिषूपयोगः। इति पूर्वशास्त्रेषु भरद्वाजबृहज्जातकादिषूक्ताः। काश्चन प्रसिद्धाः राशिग्रहादिसंज्ञाः संक्षेपतः यावद्भिरशास्त्रार्थज्ञानं संपत्स्यत तावत्य एव दर्शिताः। नाधिका इत्याह। अस्मिन् शास्त्रे राशिग्रहाणां रूपवपुःप्रमाणादयो मया न कथ्यन्ते यतस्त इहानुपयोगिनो जातकप्रश्नादिष्वेवोपयुज्यन्ते, अतस्तेषामन्यबृहज्जातकादौ विस्तरः उक्तः। राशिग्रहाणां रूपवपुःप्रमाणादिविस्तरः पूर्वाचार्यैरुक्त एवावलोक्यतामित्यर्थः। एतदुक्तं भवति—एतच्छास्त्रार्थव्यवहारमात्रज्ञानाय तदुपयोगिन्यः काश्चित्संज्ञा एवेह मयोक्ताः नान्यदनुपयुक्तमिति। तच्च यदि कस्य चित् जिज्ञासितं पूर्वशास्त्रेष्वेवावलोक्यतामिति। तत्र रूपं श्वेतरक्तादि। वपुः वृत्तचतुरश्रादि। प्रमाणं दीर्घादि। गुणास्सत्वादयः। द्रव्यं ताम्रादि। स्वभावः तीक्ष्णत्वादिः। आदिशब्देन कालरसवयोयोनितद्भेदाद्या गृह्यन्ते। कालोऽयनादिः। संख्या एकादिः।

वयः शैशवादिः । योनिः धात्वादिः । तद्भेदाः धान्यगुल्मादिपदादयः । ग्रहाणां रूपादीनि शास्त्रान्तराभिहितानीहोच्यन्ते । सूर्यादीनां वर्णा वराहमिहिरेणोक्ताः ।

वर्णास्ताम्रसितातिरक्तहरितव्यापीतचित्रासिताः

इति । लघुजातकम्—

चतुरश्रो नात्युच्चः तनुकेशः पैत्तिकोऽस्थिसारश्च ।
शूरो मधुपिङ्गाक्षो रक्तश्यामः पृथुश्चार्कः ।
स्वच्छः प्राज्ञो गौरः चपलः कफवातिको रुधिरसारः ।
मृदुवाग्घृणी प्रियसखः तनुवृत्तश्चन्द्रमाः प्रांशुः ।
ह्रस्वो हिंस्रस्तरुणः पिङ्गाक्षः पैत्तिको दुराधर्षः ।
चपलः सरक्तगौरो मज्जासारश्च माहेयः ।
मध्यमरूपः प्रियवाक् दूर्वाश्यामः सिराततो निपुणः ।
त्वक्सारस्त्रिस्थूणः सततं हृष्टस्तु चन्द्रसुतः
मधुनिभनयनो मतिमानुपचितमांसः कफात्मको गौरः ।
ईषत्पिङ्गलकेशो मेदस्सारो गुरुर्दीर्घः ।
श्यामो विकृष्टपर्वा कुटिलासितमूर्धजः सुखी कान्तः ।
कफवातिको मधुरवाक् भृगुपुत्रश्शुक्रसारश्च ।
कृशदीर्घः पिङ्गाक्षः कृष्णः पिशुनोऽलसोऽनिलप्रकृतिः ।
स्थूलनखदन्तरोमा शनैश्चरस्स्नायुसारश्च ।

कृष्णेन राहोरप्युक्तं—

अतिकृष्णतीक्ष्णकुटिलो दीर्घाङ्घ्रिर्विकटलोचनः पापः ।
वक्रगतिर्दुर्मेधाः राहुस्साक्षादधोदृष्टिः ।
शशियमकुजभुजगेन्द्राह्रस्वा रविभार्गवौ तु मध्यतनू ।

गुरुचन्द्रसुतौ दीर्घौ ह्रस्वश्चैषां वदन्त्यन्ये

गुणा बृहज्जातकोक्ताः—

चन्द्रार्कजीवा ज्ञसितौ कुजार्की
यथाक्रमं सत्त्वरजस्तमांसि ।

द्रव्याणि –‘ ताम्रं स्यान्मणिहेमशुक्तिरजतान्यर्काच्च मुक्तायसी ’ इति ।
स्वभवाः—‘ शिखिभूखपयोमरुद्गणानां वशिनो भूमिसुतादयः क्रमेण ’ ।

‘ अयनक्षणवासरर्तवो मासोऽब्दं च समाश्च भास्करात् । ’
कटुकलवणतिक्तमिश्रिता मधुराम्लौ च कषाय इत्यपि ।

वयः—वयांसि तेषां स्तनपानबालव्रतस्थिता यौवनमध्यवृद्धाः ।
अतिवृद्धा(?) इति चन्द्रभौमज्ञशुक्रार्कशनैश्चरास्स्युः ॥ इति । योनिः—

बलिनौ केन्द्रोपगतौ रविभौमौ धातुकारकौ भवतः ।
बुधसौरी मूलकरौ शशिगुरुशुक्राः स्मृता जीवाः ।

तद्भेदाः—

पितृमातृसहजभार्यात्ममिश्रतनयारयो व्यवस्थायाम् ।
अर्कशशिसौम्यभृगुगुरुराहुधरासूनुसूर्यसुताः ।

इत्यादि । अथ राशीनां रूपमुक्तं लघुजातके—

अरुणासितहरितलोहितपाण्डुविचित्राः सितेतरपिशङ्गाः ।
पिङ्गलकर्बुरबभ्रुविमलिना रुचयस्त्वजादीनाम् ।

इति । वपुः—

मत्स्यौ घटी नृमिथुनं सगदं सवीणं
चापी नरोऽश्वजघनो मकरो मृगास्यः ।
तौलिस्ससस्यदहना प्लवगा च कन्या
शेषास्स्वनामसदृशाः स्वचराश्च सर्वे ।

प्रमाणं कृष्णेनोक्तम्—

युक्तप्रमाणकायाः कुळीरयुगमकरचापास्स्युः ।
मेषझषवृषभकुम्भाः ह्रस्वाश्शेषाः पुनर्दीर्घाः ॥

इह गुणा वन्याद्याः। अटवीक्षेत्राम्बुगिरिग्रामावटारामाः नद्या मुखं सरोऽर्णवं इत्युद्देशास्त्वजादीनाम् । द्रव्यं स्वामिसदृशं । स्वभावो द्रेक्काणस्वरूपं, उक्तं च बृहज्जातके—

कट्यां सितवस्त्रवेष्टितः कृष्णः शक्त इवाभिरक्षितुं
रौद्रः परशुं समुद्यतं धत्ते रक्तविलोचनः पुमान् ॥

रक्ताम्बरा भूषणसक्तचित्ता
कुम्भाकृतिर्वाजिमुखी तृषार्ता ।
एकेन पादेन च मेषमध्ये
द्रेक्काणरूपं यवनोपदिष्टम् ॥

क्रूरः कथाज्ञः कपिलः क्रियार्थी
भग्नव्रतोऽभ्युद्यतदण्डहस्तः ।
रक्तानि वस्त्राणि बिभर्ति चण्डो
मेषे तृतीयः कथितस्त्रिभागः ॥

कुञ्चितलूनकचा घटदेहा दग्धपटा तृषिताशनचित्ता ।
आभरणान्यभिवाञ्छति नारी रूपमिदं वृषभे प्रथमस्य ॥

क्षेत्रधान्यगृहधेनुकलाज्ञो
लाङ्गले सशकटे कुशलश्च ।
स्कन्धमुद्वहति गोपातितुल्यं क्षुत्परोऽजवदनो मृदुवासाः ।

द्विपसमकायः पाण्डरदंष्ट्रः
शरभसमाङ्घ्रिः पिङ्गलमूर्तिः ।
अविमृगलोमा व्याकुलचित्तो

वृषभवनस्य प्रान्तगतोऽयम् ॥
सूच्याश्रयं समभिवाञ्छति कर्म नारी
रूपान्विताभरणकार्यकृतादरा च ।
[1]हीनात्मजोच्छ्रितभुजर्तुमती त्रिभाग-
माद्यं तृतीयभवनस्य वदन्ति तज्ज्ञाः ॥
उद्यानसंस्थःकवची धनुष्मान्
शूरोऽस्त्रधारी गरुडाननश्च ।
क्रीडात्मजालङ्करणार्थचिन्तां
करोति मध्ये मिथुनस्य चायम् ॥
भूषितो वरुणवत् बहुरत्नैः
बद्धतूणकवचः सधनुष्कः ।
नृत्तवादितकलासु च विद्वान्
काव्यकृत् मिथुनराश्यवसाने ॥
पत्रमूलफलभृद्विपकायः
काननेऽमलयशाः शरभाङ्घ्रिः ।
क्रोडतुल्यवदनो हयकण्ठः
कर्कटे प्रथमरूपमुशन्ति ॥
पद्मार्चिता मूर्धनि भोगयुक्ता
स्त्री कर्कशारण्यगता विरौति ।
शाखां पलाशस्य समाश्रिता च
मध्यस्थिता कर्कटकस्य राशेः ॥
भार्याभरणार्थमर्णवे नौस्थो गच्छति सर्पवेष्टितः ।
हैमैश्च युतो विभूषणैश्चिपिटास्योऽन्त्यगतश्च कर्कटे ॥
शाल्मलेरुपरि गृध्रजम्बुकौ

1 हीनप्रजोच्छ्रि

श्वा नरश्च मलिनाम्बरान्वितः ।
रौति मातृपितृविप्रयोजितः
सिंहरूपमिदमाद्यमुच्यते ॥
हयाकृतिः पाण्डरमाल्यशेखरो
बिभर्ति कृष्णाजिनकम्बलं नरः ।
दुरासदः सिंह इवात्तकार्मुको
नताग्रनासो मृगनाथमध्यमः ॥
ऋक्षाननो वानरतुल्यचेष्टो
बिभर्ति दण्डं फलमामिषं च ।
कूर्ची मनुष्यः कुटिलैश्च केशैः
मृगेश्वरस्यान्त्यगतस्त्रिभागः ॥
पुष्पप्रपूर्णेन घटेन कन्या
मलप्रदिग्धा मलसंवृताङ्गी ।
वस्त्रार्थसंयोगमभीप्समाना
गुरोः कुलं वाञ्छति कन्यकाद्यः ॥
पुरुषःप्रगृहीतलेखिनि-
श्शामो वस्त्रशिराव्ययायकृत् ।
विपुलं च बिभर्ति कार्मुकं
रोमव्याप्ततनुश्च मध्यमः ॥
गौरी सुधौताग्रदुकूलगुप्ता
समुच्छ्रिता कुम्भकटच्छुहस्ता ।
देवालयं स्त्री प्रयता प्रवृत्ता
वदन्ति कन्यान्तगतं त्रिभागम् ॥
वीथ्यन्तरापणगतः पुरुषस्तुलावा-

नुन्मानमानकुशलः प्रतिमानहस्तः ।
भाण्डं विचिन्तयति तस्य च मूल्यमेतत्
रूपं वदन्ति यवनाः प्रथमं तुलायाम् ॥
कलशं परिगृह्य विनिष्पतितुं समभीप्सति गृध्रमुखः पुरुषः ।
क्षुधितस्तृषितश्च कळत्रसुतान् मनसैति तुलाधरमध्यगतः ॥
विभीषयंस्तिष्ठति रत्नचित्रितो
वने मृगान् काञ्चनतूणवर्मभृत् ।
धनुर्धरो वानररूपभृन्नर·
स्तुलावसाने यवनैरुदाहृतः ॥
वस्त्रैर्विहीनाभरणैश्च नारी
महासमुद्रात् समुपैति कूलम् ।
स्थानच्युता सर्पनिबद्धपादा
मनोरमा वृश्चिकराशिपूर्वः ॥
स्थानसुखान्यभिवाञ्छति नारी
भर्तृकृते भुजगावृतदेहा ।
कच्छपकुम्भसमानशरीरा
वृश्चिकमध्यमरूपमुशन्ति ॥
पृथुलचिपिटकूर्मतुल्यवक्त्रः
श्वमृगसृगालवराहभीतिकारी ।
अवति च मलयाकरप्रदेशं
मृगपतिरन्त्यगतश्च वृश्चिकस्य ॥
मनुष्यवक्त्रोऽश्वसमानकायो
धनुर्विगृह्यायतमाश्रमस्थः ।
क्रतूपयोज्यानि तपस्विनश्च

ररक्ष पूर्वो धनुषस्त्रिभागः ॥
मनोरमा चम्पकहेमवर्णा
भद्रासने तिष्ठति मध्यरूपा ।
समुद्ररत्नानि विघट्टयन्ती
मध्यस्त्रिभागो धनुषःप्रदिष्टः ॥
कूर्ची नरो हाटकचम्पकाभो
वरासने दण्डधरो निषण्णः ।
कौशेयकान्युद्वहतेऽजिनं च
तृतीयरूपं नवमस्य राशेः ॥
रोमचितो मकरोपमदंष्ट्रः
सूकरकायसमानशरीरः ।
योक्त्रकजालकबन्धनधारी
रौद्रमुखो मकरे प्रथमस्तु ॥
कलास्वभिज्ञाब्जदलायताक्षी
श्यामा विचित्राणि च मार्गमाणा ।
विभूषणालङ्कृतलोहकर्णा यो-
षित् प्रदिष्टा मकरस्य मध्ये ॥
किन्नरोपमतनुः सकम्बळ-
स्तूणचापकवचैस्समान्वितः ।
कुम्भमुद्वहति रत्नचित्रितं
स्कन्धगं मकरराशिपश्चिमः ॥
स्नेहमद्यजलभोजनागमव्याकुलीकृतमनास्सकम्बळः ।
कोशकारवसनोऽजिनान्वितो गृध्रतुल्यवदनो घटादिगः ॥
दग्धे शकटे सशाल्मले लोहान्याहरतेऽङ्गना वने ।

मलिनेन पटेन संवृता भाण्डैर्मूर्धगतैश्च मध्यमः ॥
श्यामस्सरोमश्रवणः किरीटी
त्वक्पत्रनिर्यासफलैर्बिभर्ति ।
भाण्डानि लोहव्यतिमिश्रितानि
सञ्चारयत्यन्त्यगतो घटस्य ॥
स्रुग्भाण्डमुक्तामणिशङ्खमिश्रै-
र्व्याक्षिप्तहस्तस्सविभूषणश्च ।
भार्याविभूषार्थमपां निधानं
नावा प्लवत्यादिगतो झषस्य ।

एषां प्रयोजनमुत्तरत्र वक्ष्याम इति ॥

इत्थं विद्यामाधवीयाभिधाने चत्वारिंशत्संयुतै-रष्टभिश्च । श्लोकैर्विद्यामाधवेनात्र शास्त्रे संज्ञा-ध्यायो गुम्भितस्सोऽयमाद्यः ॥ ४१ ॥

विद्यामाधवेन प्रोक्ते विद्यामाधवीयमित्यन्वर्थकृताभिधानेऽत्र मुहूर्तशास्त्रे विद्यामाधवेन मया अष्टचत्वारिंशत्सङ्ख्यैः पद्यैः प्रथमोऽयं संज्ञाध्यायो गुम्भितः—रचितः ॥

इत्थं विद्यामाधवीये मुहूर्तादर्शे विद्यामाधवस्यात्मजेन ।
संज्ञाध्यायस्सर्वसंज्ञाभिधायी व्याख्यातोऽयं विष्णुनाऽऽद्योऽनवद्यः ॥

इति श्री विद्यामाधवीये मुहूर्तदर्शने
संज्ञाध्यायः प्रथमः समाप्तः.

अथ दोषाध्यायो द्वितीयः

अथाभिधेयस्य मुहूर्तस्य निर्दिष्टस्येष्टत्वात् गुणानामप्यप-दोषस्वरूपत्वात् आदौ तावद्दोषानेव वक्तुमुपक्रमते—

अथादिशास्त्राभिहितान् प्रसिद्धान्
संगृह्य दैवज्ञहिताय कांश्चित् ।
इहाभिधास्यामि मुहूर्तदोषान्
कार्त्स्न्येन कस्तत्कथनाय शक्तः ॥ १ ॥

अथ संज्ञाभिधानानन्तरं, यद्वा गुणानां यथासंभवमुपादे-यत्वात् दोषाणामवश्यं हेयत्वात् गुणदोषनिरूपणे कार्ये । तत्रादौ आदिशास्त्रेषु—बार्हस्पत्यादिषु प्रोक्तान् प्रसिद्धान् प्रधानभूतान् कांश्चित् मुहूर्तदोषान् दैवज्ञहिताय—ज्योतिर्विद्भ्यो हितार्थं, इह संगृह्याहमभिधास्यामि । यतस्संग्रहाभिधानमन्तरेण कार्त्स्न्येन नि-श्शेषतो मुहूर्तदोषकथनाय कश्शक्तः, दोषाणामानन्त्यात् अशेषतो दोषान् वक्तुं न कश्चिदपि शक्नोति । तस्मादिह प्रसिद्धा एव केचन दोषाःकथ्यन्त इत्यर्थः ।

एतावन्तो दोषा इहाभिधीयन्ते इत्याह त्रिभिश्श्लोकैः—

दुष्टांस्तिथ्यृक्षवारानथ विषघटिकाः कृष्णपक्षा-
पराह्णौ धूमादीन् पञ्च सौरान् गुळिकदिनगदौ स-

ग्रहार्धप्रहारौ । विष्टिं षड्दुष्टयोगानुडुतिथिकुहरे कालचक्रार्धपातान् स्थूणादींस्त्रींश्च मृत्यून् विहग-हिमशिखे कण्टकौ द्वौ च गण्डम् ॥ २ ॥

नक्षत्रं भवनं च कर्तुरशुभं वैनाशिकैकार्गलौ शून्यादिग्रहयुक्तगम्यगतभं ज्वालादियोगांश्च षट् । मासाब्दावसतीरनोजदिवसान् शुक्रार्ययोर्मूढतां सं-दृष्टिं च सवेधशूलमधिकान् मासांश्च केतूदयं ॥ ३ ॥

उद्वाहे च विशेषतः परिहरेत् वेधं शलाकाह्वयं तत्तत्कर्मसु गर्हितां ग्रहगतिं मासर्क्षराश्यादिकान् । दोषान् कर्मविनाशकान् विदुरिमानन्याननेकान-पि ज्ञात्वा तान् परिहृत्य सूक्ष्ममतयः कुर्वन्तु सर्वाः क्रियाः ॥ ४ ॥

दुष्टतिथयः—छिद्राः । दुष्टर्क्षाणि—शुभक्रियानभिहितास्तारा राशयश्च, दुष्टवाराः—पापवाराः, अथशब्दः आद्यर्थः, तेन पाप-होराद्या गृह्यन्ते, नक्षत्रेषु विषनाडिकाः, सौराः—सूर्यचारभवाः भूकम्पादयः, दुष्टयोगा—नित्ययोगादयः परस्परयोगाद्दोषीभवन्तः षड्योगाः, उडुतिथिकुहरे नक्षत्रकूपं तिथिकूपं च, कालौ द्वौ कालर्क्षं कालान्तं च । चक्रार्धपातौ द्वौ—चक्रपातो वैधृतः, चक्रार्ध-पाते—व्यतीपातः इति, स्थूणास्त्रयः स्थूणः, कण्टकस्थूणः, रक्तस्थूणः,

मृत्यवस्त्रयः—दिनमृत्युः, तारामृत्युः, राशिमृत्युश्च । विद्धक्—अन्धनक्षत्रं त्रिविधं, अहिमशिखा—उष्णशिखा, कण्टकौ द्वौ— कण्टकनक्षत्रं यमकण्टकांशश्च, कर्तुरशुभनक्षत्रं—विपदादि, कर्तुरशुभो राशिरष्टमादिः । वैनाशिकोऽशस्तारा वा, शून्यानि मासातिथिराशिनक्षत्रशून्यानि, ग्रहमुक्तगम्यगतभं—ग्रहदग्धभूमितज्ज्वलितानि त्रीणि नक्षत्राणि, कुजादिदृष्टियुक्तान् षट् ज्वालादिसंज्ञांस्तारायोगान्, चतुर्विधानां मासानामन्तं, त्रिविधाब्दानामन्तं च, अनोजादिवसाः—कालिकालकार्णवधादिनानि, शुक्रजीवयोरस्तभावः परस्परदृष्टिश्च । चशब्देन तयोर्बाल्यं वार्धक्यं च, ग्रहवेधर्क्षं, ग्रहशूलाख्यं नक्षत्रं, अधिकांस्त्रीन् संसर्पांहस्पत्यधिकाख्यान् मासान्, केतूनामुत्पातनिर्घातधूमकेतूल्कानामुदयः । अन्यत् विवाहे दुष्टं शलाकाख्यं वेधर्क्षं तत्तत्कर्म (सु) विगर्हितान् तेषुतेषु विवाहादिषु शुभकर्मसु निषिद्धान्, अस्मिन् कर्मण्यत्र स्थाने ग्रहशुद्धिरित्येवंरूपा ग्रहगतिः, अस्मिन् कर्मण्ययं मासो नेष्टः एतन्नक्षत्रं निषिद्धं अयं राशिरनिष्ट इति । आदिशब्देनेयं तिथिर्निन्दिता इदं दिनं दुष्टमित्याद्युक्तमनुक्तं च द्रष्टव्यम् । इमान् उक्तान् सर्वान् दोषान् कर्मविनाशनान् विदुः । अनेन दोषाणामन्वर्थत्वमुक्तं—दूषयन्ति कर्माणि नाशयन्तीति दोषा इति । ईदृशानन्यानप्यनेकान् दोषान् शास्त्रान्तरेषु दृष्टान् सर्वान् कर्मफलविनाशनान् वदन्ति । तस्मादिहोक्ताननुक्तांश्च व्याख्यानादिभिर्ज्ञात्वा तान् सर्वान् परिहृत्य सर्वाश्शुभक्रियाः कुर्वन्तु सूक्ष्ममतयः—गुणदोषबलाबलविवेककुशलाः । अनेन निश्शेषपरिहारस्य दुरापत्वात् गुणप्राबल्यं दोषदौर्बल्यं चान्वीक्ष्य शुभक्रियाः कार्या इत्युक्तम् ॥

अथ दुष्टनक्षत्रादीनाह—

अग्न्यन्तकद्विरसनात्रिदशेशरुद्राः
पूर्वात्रयं च बहुलं पितृमूलशूर्पाः ।
छिद्राश्च पापदिवसास्पदकालहोरा-
स्त्याज्यो गणोऽयमखिलासु शुभक्रियासु ॥ ५ ॥

द्विरसनः—सर्पः, त्रिदशेशः—इन्द्रः, कृत्तिकाद्योऽष्टौ तारा स्सर्वशुभकर्मसु वर्ज्याः । तदन्या ग्राह्याः प्रशस्ताः । पितृमूलशूप बहुलं—क्वचित्त्याज्याः, क्वचिद्ग्राह्याः अतो मध्याः । अत्र भरद्वाजः—

रौद्रेन्द्रयाम्यज्वलनं च सार्पं
तिस्रश्च पूर्वा इति पापसंज्ञाः ।
पापानि पापेषु तथा प्रयुञ्ज्यात्
शुभानि तान्येषु विवर्जयीत ॥
शेषाश्शुभाः कार्यकरास्तथैव
मङ्गल्यताराश्च भवन्ति सर्वाः ।
प्रशस्तमध्यानवमान् विचिन्त्य
नक्षत्रवीर्येण समं प्रयुञ्ज्यात् ॥ इति ।

छिद्राः—चतुर्थ्याद्याः षट् तिथयः । चशब्दात् विष्ट्यादिपञ्चकरणानि तथा स एव—

विष्ट्यां चतुष्पदे नागे किंस्तुघ्ने शकुने तथा ।
वर्जयेच्छुभकार्याणि दारुणादीनि कारयेत् ।

इति । नारदोऽपि—

बवादिवणिजान्तानि शुभानि करणानि षट् ।
परीता विपरीता वा विष्टिर्नेष्टा तु मङ्गले ॥

इति । पापानां दिवसराशिकालहोरा अपि त्याज्याः । शुभानां ता ग्राह्याः । तथाच श्रीपतिः—

सोमसौम्यगुरुशुक्रवासराः
सर्वकर्मसु भवन्ति सिद्धिदाः ।
भानुभौमशनिवासरेष्वपि
प्रोक्तमेव खलु कर्म सिध्यति ॥
मिथुनतुलकुलीरा धन्विगोमीनकन्या
इह शुभभवनत्वाद्राशयस्सप्त सौम्याः ।
अलिमृगघटसिंहाजाश्च पापास्पदत्वा-
न्मुनिभिरभिहितास्ते राशयः क्रूरभावाः ॥

इति । इहास्पदग्रहणेन षड्वर्गोऽपि गृह्यते, न तु राशिमात्रं, यत-श्श्रीपतिः—

वर्गे शुभे लग्नगते तु सौम्ये
सपौष्टिकं कर्म बुधैः प्रदिष्टम् ।
लग्नं प्रपन्ने पुनरुग्रवर्गे
स्यात् कर्मणः क्रूरतरस्य सिद्धिः ॥
यस्य ग्रहस्य वारे यत् किञ्चित् कर्म प्रकीर्तितम् ।
तत्तस्य कालहोरायां सर्वमेव विधीयते ॥

इति । अयं नक्षत्रादिर्गणः सामान्येन सर्वशुभक्रियासु त्याज्यः । एतद्व्यतिरिक्त ऋक्षादिर्गणो ग्राह्य इत्यर्थादेव सिद्धः । यद्यत्र क्वचित् कश्चन विशेषोऽस्ति स तत्रतत्रैवाभिधास्यते । एतेषु दुष्टतारातिथिवाराख्यास्त्रयो दोषा उक्ताः । पापराश्यादीनामिह त्याज्यगुणत्वख्यापनाय सहपाठः । एष कैश्चिदेक एव दोष इत्युक्तः ।

तथा च नारदः—

तिथिवारर्क्षयोगानां करणस्य च मेळनम् ।
पञ्चाङ्गमस्य पञ्चानां शुद्धिस्सा परिकीर्तिता ॥ इति ।
पञ्चाङ्गशुद्धिरहितो दोषस्त्वाद्यः प्रकीर्तितः ।
यस्मिन् पञ्चाङ्गदोषोऽस्ति तस्मिन् लग्नं निरर्थकम् ॥

इति । विषघटीराह—

त्रिंशद्द्विगुणितकृतिमनुगिरिशास्त्रिंशत्कृतिर्द्वि-जास्त्रिंशत् । कृतिधृतिसमिधः कृतिमनुमनुदिङ्-मनुकृतिजिनाः कृतिः ककुभः ॥ ६ ॥

दशविद्यानृपतिजिनास्त्रिंशत्पञ्चाशतो जिना-स्तेभ्यः । परतो घटीचतुष्कं विषसंज्ञं कृत्तिकादिषु ज्ञेयम् ॥ ७ ॥

द्विगुणितकृतिः—चत्वारिंशत्, द्विजाः—द्वात्रिंशत्, ककुभः—दश । विद्या—अष्टादश, कृत्तिकादिषु भरण्यन्तेषु नक्षत्रेषु उक्तसंख्या घटिका अतीत्य तत्परतो घटिकाचतुष्टयं विषसंज्ञं ज्ञेयम् । यथा कृत्तिकायां त्रिंशद्घटीरतीत्य परमेकत्रिंशाद्याश्च-तस्रो घटिका विषाख्याः । एवमन्येष्वपि । उक्तं च सर्वसिद्धौ—

त्रिंशद्दिक्सहितो मनुस्त्रिरहितस्त्रिंशन्नखोऽर्कान्वित
स्त्रिंशद्विंशधृतीध्मविंशमनवः शक्रा दिगिन्द्रा नखाः ।
साब्धिविंशतिदिग्दिशो धृतिमहीपाला जिनत्रिंशतः
पञ्चाशज्जिनमग्निभादिषु परं नाडीचतुष्कं विषम् ॥

इति । त्रिंशद्विगुणितकृतिमनुसामिध इति पाठोऽप्यस्ति । स एव बहुमुनिसंमतः ।

तथाच नारदः—

खमार्गणा वेदपक्षा खरामा व्योमसागराः ।
वार्धिचन्द्रा रूपदस्राः खरामा व्योमबाहवः ॥

इति । तत्फलं—

ऋक्षेषु विषनाड्यस्तत्कर्तृकर्मविनाशनाः ॥

इति । योगानामपि विष[1]नाडीः कश्चिदाहुः—

तुङ्गस्सोमश्शशी रुद्रो नागो नन्दादिषु क्रमात् ।
नाडिकायाः परं वर्ज्याश्चतस्रो विषनाडिकाः ॥

विष्कादिषु च

मुनिर्नम्यो नरस्सन्नो मानो नागे मनो नये ।
नाकस्तुल्यः शयो नेयः धेनुः कार्यो नृपो सनिः ॥
मानी सूनुः भटः क्रूरो नित्यं मानो मनो धनुः ।
दानं श्रेष्ठं गयेऽतीते चतस्रो विषनाडिकाः ।

धूमादीनाह—

धूमो वेदगृहैस्त्रयोदशभिरप्यंशैः समेते रवौ स्यादस्मिन् व्यतिपातको विगळिते चक्रादथास्मिन् युते । षड्भिर्भैः परिवेष इन्द्रधनुरित्यस्मिंश्च्युते मण्डलादत्यष्ट्यंशयुतेऽत्र केतुरथ तत्रैकर्क्षयुक्ते रविः ॥ ८ ॥

[1] घटीः.

तात्कालिकेऽर्के चतुरो राशीन् त्रयोदशभागांश्च संयोज्य धूमो नाम दोषो भवति। तस्मिन् धूमराशिचक्रात् विशुद्धे शिष्टो व्यतीपाताख्यः। अस्मिन् व्यतीपाते षड्राशीन् संयोज्य परिवेषो नाम। परिवेषे राशिमण्डलात् शुद्धे इन्द्रधनुर्नाम। तत्र सप्तदश भागान् क्षिप्त्वा केतुर्नाम। पुनश्चातुर्यप्रदर्शनाय केतौ राशिमेकं संयोज्य तात्कालिकोऽर्को भवति। धूमादिप्राप्तनक्षत्रांशोभयपार्श्वांशस्त्याज्यः। तथाच गुरुः—

चत्वारो राशयो भानोर्भागा युक्तास्त्रयोदश।
धूमो नाम महादोषस्सर्वशोभननाशनः॥
धूम मण्डलशुद्धे तु व्यतीपातोऽपरो विषः।
व्यतीपाते तु षड्राशियुते च परिवेषकः॥
मण्डलात्परिवेषाख्ये शुद्धे वज्रिधनुस्ततः।
अस्मिन्नत्त्यष्टिभागैस्तु युक्ते केतुः परो विषः।
एकराशियुते केतौ भानुरेष्विन्दुलग्नयोः।
युतेष्वायुर्यशोज्ञानवंशवित्तविनाशनाः।
पञ्च दोषा इति ख्याताः तत्र चेद्वर्तते विधुः।
तदन्तोभयपार्श्वांऽशस्त्याज्यश्चान्यश्शुभो मतः॥

इति। सौरानाह—

भूकम्पोंऽशैरशीत्याऽन्वित इन उडु यत्सर्वदोऽ-
ल्कानिपातो निरयत्रार्धोनयाऽस्मिन् भवति कृति-
कलाविश्वभागोनया च। पूर्वाह्ने ब्रह्मदण्डो ध्वज

इति च तया तत्र निन्द्योऽपराह्णे तेषूर्ध्वं प्राप्तनाड्यस्तपनगिरिहरित्तर्कनाड्योऽतिनिन्द्याः ॥ ९ ॥

अंशैरशीत्या—भागानामशीत्या—राशिद्वयेन विंशत्यंशैश्चान्विते तात्कालिकेऽर्के यन्नक्षत्रं सप्तमं स भूकम्पः । स च सर्वदा—दिवा निन्द्यः, रात्रौ च निन्द्यः ।

अत्र—भूकम्पे अर्घोनयाशीत्या—अंशानां चत्वारिंशता—एकराशिना दशभागैर्युक्ते यन्नक्षत्रं पञ्चदशकं स उल्कानिपातः । स रात्रौ, न दिवा दुष्टः ।

अस्मिन्नुल्कानिपाते कृतिकलाभिः त्रिभागैश्चोनयाऽशीत्या—षट्षष्टिभागैः चत्वारिंशल्लिप्ताभिश्च युक्ते यन्नक्षत्रं पञ्चदशं स ब्रह्मदण्डः । स पूर्वाह्णे निन्द्यः, नान्यदा ।

तत्र—ब्रह्मदण्डे, तया—भागाशीत्या—राशिद्वयेन विंशतिभागैश्च युते यन्नक्षत्रमेकविंशं स ध्वजो नाम सौरो दोषः । स चापराह्णे निन्द्यः, न पूर्वाह्णे, न रात्रौ च, तेषु भूकम्पादिषु तात्कालिकी यावती घटिका वर्तते तस्याः परतो द्वादशसप्तदिक्षट्सङ्ख्या नाड्योऽतिनिन्द्याः स्युः ।

तथाच गार्ग्यः—

दशमं सप्तमं भानोः पञ्चदश्येकविंशतिः ।
उल्कापातो धराकम्पः ब्रह्मदण्डो ध्वजः क्रमात् ।
यस्मिन् स्थितोऽशके सूर्यस्तत्सङ्ख्यांशस्तदूर्ध्वतः ।
वर्जितास्सौरदोषाणां स्वरमासदशर्तवः ।
नाड्यस्त्याज्याः प्रयत्नेन राशिशेषोऽथवा पुनः ॥

भरद्वाजः—

धराकम्पादिभिर्युक्ते वर्ज्यास्सप्ताधर्मनाडिकाः ।

इति । नारायणः—

पूर्वाह्णे दण्डदोषस्स्यात् ध्वजश्चैवापराह्णके ।
उल्का रात्रौ तु विज्ञेया कम्पस्सर्वत्र गर्हितः ॥

तत्फलं गुरुणोक्तं—

कम्पे स्थानविनाशस्स्यादुल्कायां दह्यते कुलम् ।
दण्डे स्वामिविनाशस्स्यात् ध्वजे सर्वविनाशनम् ।
तस्मादेष्वर्कदोषेषु सर्वकर्म विवर्जयेत् ॥ इति ।

ननु सूर्यात् सप्तममृक्षं भूकम्प इत्याद्येतावतैवाभिधेयसिद्धौ लब्धायां किमिदमसारभूतं अंशांशक्षेपादिकं कृतमिति, अत्रोच्यते—यदा रविरूप (?) नक्षत्रान्तं स्थितस्तदा निन्द्यनाड्योऽष्टमर्क्षेऽपि प्राप्नुयुरिति । अन्ये चोपग्रहाख्यास्सौरास्सन्ति ते चोक्ताः जयपद्धतौ—

सूर्यात्पञ्चमभे विद्युन्मुखः शूलस्ततोऽष्टमे ।
चतुर्दशेऽशनिर्नाम केतुरष्टादशे स्थितः ।
उल्का विंशतिभे वज्रो द्वाविंशो भूमिकम्पनः ।
त्रयोविंशे चतुर्विंशे निर्घातोऽष्टावुपग्रहाः ॥

इति । उल्का स्यादेकविंशतिरिति केचित् ।

सौरदोषफलमुक्तं नरपतिना—

स्वस्थाने विघ्नता प्रोक्ता सर्वकार्येषु सर्वदा ।

श्रीपतिनाऽपि—

इष्विन्दुभेषु न शुभं खलु कर्म कार्य-
सिद्धिं प्रयाति दहनादिविषादिसाद्ध्यम् ॥

इति । गुळिककण्टकार्धप्रहारानाह द्वाभ्याम्—

ग्रहा वारनाथादयो वासरस्य
क्रमेणाष्टभागाधिनाथाः क्रमेण ।
तथा यामवत्याश्च तत्पञ्चमाद्याः
य आद्यांशनाथः स एवाष्टमस्य ॥ १० ॥

उक्तक्रमात् गुळिकमर्कसुतस्य भागं
जीवांशकं तु यमकण्टकमामनन्ति ।
अर्धप्रहारमरुणादिदिनेषु वेद-
शैलाक्षिबाणवसुवह्निगुहाननांशान् ॥ ११ ॥

रविसावनदिनस्य यत् स्फुटं प्रमाणं तदष्टांशानां किञ्चिदूनाधिकपादोनचतुर्घटीरूपाणां तद्वाराधिपाद्यास्सप्त ग्रहाः पतयः, तथा रात्रिप्रमाणाष्टांशानां वारेशपञ्चमाद्याः सप्त क्रमेण स्वामिनस्स्युः । अवशिष्टस्याष्टमांशस्याद्यांशनाथ एव पतिः । दिवा वारेशः रात्रौ तत्पञ्चम एवेत्यर्थः । तथाचोक्तं—

ग्रहा वाराधिपाद्यन्ता दिनमानाष्टभागपाः ।
वारेशपञ्चमाद्यन्ताः रात्रिमानाष्टभागपाः ॥

इति । दिवा रात्रौ चोक्तक्रमेण प्राप्तं मन्दस्यांशं गुळिकमाहुः । जीवस्यांशं यमकण्टकमाहुः । तथाच गुरुः—

दिनमानाष्टभागेशाः वारेशाद्या ग्रहाः क्रमात् ।
शन्यंशो गुळिको दोषो जीवांशो यमकण्टकः ॥

इति । वारेषु दिवा रात्रौ च चतुस्सप्तद्विपञ्चाष्टत्रिषट्संख्यांशानर्ध-

प्रहारानाहुः । अत्र श्रीपतिः—

मनीषिणोऽर्धप्रहरान् द्वितीयादारभ्य सर्वेष्वपि मङ्गलेषु ।
भौमोशनस्सूर्यबुधार्किचन्द्रसुरेज्यवारेष्वपि वर्जयन्ति ॥

एषां स्वांशेषु त्रिधा कृतेषु स्वांशप्रथमभागेऽर्धप्रहार उदेति । स्वांशमध्यभागे यमकण्टकः । स्वांशान्त्यभागे गुळिकः । तथाचाहुः—

अदावर्धप्रहारस्स्यात् मध्ये तु यमकण्टकः ।
अन्ते तु गुळिको दोषः ॥

इति । गुळिकोदयं केचिदन्यथाऽऽहुः । तथाच श्रीपतिः—

मन्वर्कदिग्वस्वृतुवेदपक्षै-
रर्कान्मुहूर्तैर्गुळिका भवन्ति ।
बुधान्निरेकैरथ यामिनीषु
ते गर्हिताः कर्मसु शोभनेषु ॥

इति । सर्वसिद्धौ—

स्वोदयघ्नाश्चतुर्वाराः स्वतुल्यविघटीयुताः ।
द्व्यूना[1] गुळिकनाड्यस्स्युरन्यथाऽन्ये प्रचक्षते ॥

सङ्ग्रामविजये—

तद्वारादि यमान्तं [2]त्रिंशद्गुणितं प्रमाणपरिहीनं ।
वसुहृतनाडिविनाड्यो गुळिकस्तात्कालिको भवति ॥

इति । ननु चतुर्णामेतेषां मतानामन्योन्यवैषम्यदर्शनात् कथमयं निश्चीयते गुळिकोदयः? उच्यते—मन्दांशो गुळिक इति सामान्याभिधानं, तेन मन्दांशे गुळिकोदय इत्येतावदेव सिद्धम् । तस्मिन् सर्वत

---

[1] न्यूना—B. [2] त्रिंशद्गुणितप्रमाणपरि.

एकदेशे वेत्याशङ्कायां, 'स्वोदयघ्नाश्चतुर्वीराः' 'तद्वारादियमान्तम्' इत्युभे अपि प्राप्तुतः, तत्र सङ्ग्रामविजयोक्तः मन्दांशान्तादर्वाचीनघटिकायां गुळिकोदयस्यानवसेयत्वात् तद्घटिकैव गुळिकोदयः। सर्वसिद्ध्युक्तश्च तदन्त्यऽंशे। अनयोश्च नाडिकामात्रमूनं वाऽन्तरामिति गुळिकस्योदयस्यानवसेयत्वात् तद्घटिकैव गुळिकोदय इति। तथाच नारायणः—

गुळिको नाडिकामात्रस्थायी त्याज्यस्स्वयत्नतः।
अतस्तदुदये कर्म कृतं सर्वं विनश्यति ॥

इति। श्रीपतिना तु तदुदयस्पर्शदुष्टा इत्यमी मुहूर्ता निन्दिताः। तथाचात्रिः—

गुळिकान्तराशिशेषस्त्याज्यो ह्याघ्रातपुष्पवत्।

इति। सर्वैरपि मन्दांशान्तऽंशे गुळिकोदय इति प्रतिपन्नं, गुळिके कृत्यं चात्रिणाऽभिहितम्।

गुळिके श्राद्धर्णमोक्षलवनावेशनाः शुभाः।

इति। गुळिकस्वरूपं सङ्ग्रामविजयेऽभिहितम्।

नीलाञ्जनसङ्काशो रक्ताक्षो विषमभीषणो दीर्घः।
पञ्चास्यः पृथुदंष्ट्रो भयंकरस्सर्वहा गुळिकः ॥

इति। दिनगददिनमृत्यू आह—

भवत्याद्ये बुध्नयद्विरसनभयोर्मूलयमयो-
र्द्वितीयस्मिन्नंशे गुणपरिमिते विष्णुभगयोः।
शशिस्वात्योरन्त्ये शुभफलविरोधी दिनगद-
स्तृतीयेंऽशे तस्मादुपरि दिनमृत्युश्च बलवान्॥१२॥

उत्तराभाद्रपदाऽऽश्लेषयोराद्येंऽशे दिनरोगः। गुणपरिमिते—तृतीये। अत्र गुरुः—

सर्पाजतारयोराद्यं द्वितीयं यममूलयोः।
श्रोणोत्तरे तृतीयांशमन्त्यांशं वायुसोमयोः॥
दिनरोगा इमे ख्यातास्तेषु रोगी भवेन्नरः।
शुभकर्मकृदत्यर्थं तस्मादेतान् विवर्जयेत्॥

इति। दिनरोगा इति। द्वितीयांशादुपरि तृतीयेंऽशे दिनमृत्युश्च भवति। यथाऽऽह गुरुः—

हस्तवासवयोराद्यं विशाखार्द्राद्वितीयकम्।
तृतीयोऽप्यहिर्बुध्नघे च स्वान्त्यांशं यममूलयोः॥
दिनमृत्यव इत्युक्ताः सर्वे शोभनकर्मसु।
कर्मकर्त्रोर्मृतिं दद्युस्तस्मादेतान् विवर्जयेत्॥

इति। द्वितीयस्मिन्निति "तीयस्य वा ङित्सूपसङ्ख्यानम्" इति सर्वनामसंज्ञायां ङेस्स्मिन्नादेशः। चशब्दोऽनुक्तसमुच्चयार्थः, तेन निशामृत्युर्गृह्यते। तथाचात्रिः—

आद्योंऽशोत्तर? जीवोन्त्ये द्वितीयः पितृसोमयोः।
तृतीयं पुष्यमित्राजाचित्रामूलमखास्वपि॥
विष्णुर्केयोश्चतुर्थांशो निशामृत्युश्शुभं त्यजेत्।
भुक्तौ व्याधिर्गतौ मृत्युर्विवाहे विधवा वधूः॥
प्रवेशे सर्वनाशस्स्यात् दर्शने शत्रुता द्वयोः॥

इति। सग्रहमाह—

भूपाद्भयं रिपुभयं व्यसनं प्रवासं
वित्तक्षयं विशरणं च शुभक्रियासु।

कर्तुः करोति शशभृत् क्रमशोऽर्कपूर्वै-
रेकां ग्रहैस्सह विशन्नुडुमेकराशौ ॥ १३ ॥

अर्काद्यैः सहैकस्मिन् राशौ एकं नक्षत्रं विशन् शशी क्रमेण राजभयादीनि करोति, व्यसनं—विपत्तिं, विशरणं—मरणं। अत्र गर्गः—

सूर्यो राजभयं करोति नियतं युक्तोऽर्थनाशं भृगुः
स्थानभ्रंशमतो गुरुश्शशिसुतः सन्तापदुःखप्रदः ।
मृत्युं सूर्यसुतः करोति नियतं शस्त्राद्भयं भूमिज-
स्तस्माच्चन्द्रयुतग्रहेषु मतिमान् सर्वाः क्रिया वर्जयेत् ॥

इति । नारदोऽपि विवाहाध्याये—

शशाङ्को ग्रहसंयुक्तो दोषस्सग्रहसंज्ञितः ।
सूर्येण संयुते चन्द्रे दारिद्र्यं भवति ध्रुवम् ॥
कुजेन मरणं व्याधिर्बुधेन त्वनपत्यता ।
दौर्भाग्यं गुरुणा चैव भार्गवेण[1] ? सापत्न्यं ॥
[2]प्रवृज्यात् सूर्यपुत्रेण राहुणा कलहः सदा ।
केतुना संयुते चन्द्रे नित्यं दुःखोपसेवनम् ॥

इति । विष्ट्युदयानाह—

शुक्ले वारिधिनागरुद्रतिथिसंख्यातासु पक्षेऽसिते तत्पूर्वास्वपि नक्तमह्नि तिथिषु प्रोद्याति विष्टिः क्रमात् । दिग्यामेषु शराक्षिशैलयुगषट्त्र्यष्टेन्दुसङ्ख्येष्वथो यामेष्वाद्यजगच्छरान्त्यदहनेष्वन्त्याद्यनाडीषु च ॥ १४ ॥

---

[1] सापत्न्यं भार्गवेणच इतिस्यात्. [2] प्रव्रज्या इति स्यात्.

शुक्ले पक्षे चतुर्थ्यादिषु, असिते—कृष्णे ताभ्यः चतुर्थ्यादिभ्यः पूर्वासु—तृतीयादिषु तिथिषु च क्रमात्—पर्यायेण नक्तं अपरार्धे, अह्नि पूर्वार्धे च विष्टिः। स्वोक्तयामघटिकायां [1]सयामस्तद्दिश्युदेति।

तिथिनक्षत्रपूर्वार्धो दिवाभागो निशा परः॥

इति। भरद्वाजः—

यामस्सार्धसप्तघटीरूपः। एतदुक्तं भवति—शुक्ले पक्षे चतुर्थ्यां पञ्चमयामे अद्यघटिकायां वारुण्यां दिशि विष्टिरुदेति। अष्टम्यां द्वितीययामे तृतीयघटिकायामाग्नेय्यां। एकादश्यां सप्तमयामे पञ्चमघटिकायामुत्तरस्यां। पञ्चदश्यां चतुर्थयामेऽन्त्यघटिकायां नैरृत्यां, कृष्णे तृतीयायां षष्ठयामे तृतीयघटिकायां मारुत्यां, सप्तम्यां तृतीययामे पञ्चमघटिकायां दक्षिणस्यां। दशम्यामष्टमयामेऽन्त्यघटिकायामैशान्यां। चतुर्दश्यामाद्ययामे प्रथमघटिकायां पूर्वस्यां दिशीति। एतदुक्तं गुरुणा—

अत्र तृतीयादशम्योः विष्ट्युदयव्यत्ययं केचिदाहुः।

तथाच रल्लः—

जलानलेन्दुकूरेशधर्मवातेन्दुदिक्क्रमात्।
सङ्ख्यासमानैः प्रहरैः विष्टिरष्टमुखी यतः॥

इति। भूतदस्रस्वराम्भोधिषडग्निवसुरूपकाः।
यामदिक्सङ्ख्यकान्येषु क्रमात्तिथ्यर्धविष्टिषु।

एतदेव साधु। यस्मादष्टौ विष्टयः। तास्त्वाद्या प्रथमयामादौ द्वितीया द्वितीययामादिहोरान्ते। तृतीया तृतीययामाद्वि[2]होरान्ते। चतुर्थी चतुर्थयामान्त उदेति। पञ्चम्याद्यास्तु व्यस्तामिति। प्रोद्याति—प्रकर्षेण ऊर्ध्वलोकादायातीत्यर्थः।

---

[1] अत्र सयामेत्यनुपयुक्तमिव भाति [2] द्वितीयहोरान्ते इति स्यात्।

तथाच गुरुः—

यद्दैवावतरत्येषा दिवि भूः कम्पते तदा ।
तदानीं कृतसत्कर्म कर्त्रा सह विनश्यति ॥
कृष्णाम्भोदोपमेया सुमहदपघना वर्णचिह्नादिवेगै-
रग्न्याकाराऽवमज्ज्वलनयनयुगविषा दग्धलोकोग्रदंष्ट्रा ।
उन्नासा व्यायतास्या ज्वलनकणगणैर्विस्फुलिङ्गाङ्गभीमा
त्रैलोक्यं दग्धुकामा भुवि यमसदनादाविशत्यह्नि विष्टिः ॥

इति । तदुत्पत्तिः श्रीपतिनोक्ता—

दैत्येन्द्रैस्समरेऽमरेषु विजितेष्वीशः क्रुधा दृष्टवान्
स्वं कायं किल निर्गता वरमुखी लाङ्गूलिनी च त्रिपात् ।
विष्टिः सप्तभुजा मृगेन्द्रगळका क्षामोदरी प्रेतगा
दैत्यघ्नी मुदितैस्सुरैस्तु करणप्रान्ते नियुक्ता सदा ॥

इति । इह केचित् स्वोदयादिघटिकाभिः विष्टचक्रं परिकल्प्याङ्गवि-भागेन फलमाहुः । तथाच गार्ग्यः—

मुखे तु घटिकाः पञ्च द्वे कण्ठे तु सदा स्थिते ।
हृदि चैकादश प्रोक्ताश्चतस्रो नाभिमण्डले ॥
कट्यां पञ्च च विज्ञेयाः तिस्रः पुच्छे जयापहाः ।
मुखे कार्यविनाशाय ग्रीवायां धननाशिनी ॥
हृदि प्राणहरा ज्ञेया नाभ्यां तु कलहावहा ।
कट्यामर्थपरिभ्रंशो विष्टिपुच्छे ध्रुवं जयः ॥

इति । तिथ्यर्धप्रथमादिघटिकाभिरङ्गं कल्पयन्ति तदयुक्तं, यत उक्तं—

यस्मिन् यामे मुखं तस्यास्तत्प्रयत्नेन वर्जयेत् ॥

इति। भरद्वाजेन व्यक्तमुक्तम्—

तिथ्यर्धं करणैर्युक्ता विष्टिर्यत्रोपतिष्ठते।
तत्सर्वं परिहर्तव्यमित्याह भगवान् भृगुः॥
करणस्य चतुर्भागमाद्यस्य प्रथमं त्यजेत्।
द्वितीयस्य द्वितीयं हि तृतीयस्य तृतीयकम्॥
चतुर्थस्यान्त्यभागं हि वर्जितव्यं तु नापरम्।

इति। नैवं चेत् पूर्णायां तिथ्यर्धान्त्यजो विष्ट्युदयस्तद्दोषो प्राप्नोति। विष्ट्युदयघटिकायां पुच्छत्वं वा, तस्मात् स्वोदयादिघटिकाभिर्मुखाद्यङ्ग-कल्पनैव युक्ता। अयं विष्ट्युदयोऽवश्यं वर्ज्यः। यस्मात् भरद्वाजः—

गुणानां तु सहस्रेऽपि नेष्टो विष्टिसमाश्रयः।
विष्टियोगे कृतं कार्यं विनाशमुपगच्छति॥

अन्ये यामा नातिदारुणाः। यस्मादयमेव—

यदा तु जायते विष्टिः क्षणमात्रेण शाम्यति।
सर्वं दहति संप्राप्ता शीघ्रमाशीविषा इव॥

इति। दुष्टयोगानाह—

नित्या विष्कम्भादयो वारतिथ्यो-
वारिक्षाणां वारताराातिथीनाम्।
तारातिथ्यो राशितिथ्योरितीमे
योगा ज्ञेयाष्षट् शुभाश्चाशुभाश्च ॥१५॥

सूर्येन्दुयोगजा विष्कम्भाद्या नित्यसंज्ञा योगाः। तथा वारतिथि-योगाः, वारर्क्षयोगाः वारर्क्षतिथियोगाः, राशितिथियोगाः, तारातिथि-योगाः, इतीमे षड्योगाः शुभाः, षडशुभाश्च भवन्ति।

नित्येष्वशुभानाह—

निन्द्यन्ते नित्ययोगेष्वपि नव परिघस्सव्यतीपातवज्रो व्याघातो वैधृतिश्च प्रथमपरिवृताश्शूलगण्डातिगण्डाः। लोकान्तेंशाङ्कराषर्बुधतिथिविशिखद्वीपतर्काङ्गसंख्याः नाड्यः प्रान्तेषु तेषामपि खलु नियमात् सज्जनैर्वर्जनीयाः ॥ १६ ॥

नित्ययोगेषु परिघाद्या नव निन्द्यन्ते। प्रथमो विष्कम्भः।

तथा गुरुः—

व्याघातः परिघो वज्रो व्यतीपातोऽथ वैधृतिः।
गण्डातिगण्डौ शूलं च विष्कभं नव वर्जयेत् ॥

इति। उषर्बुधास्त्रयः, विशिखाः पञ्च, द्वीपास्सप्त, तर्काष्षट्, अङ्गानि षट्, तेषां—परिघादीनां, प्रान्तेषु लोकादिनाड्योऽवश्यं वर्जनीयाः।

तथाच गुरुः—

त्रीणित्रीणि नव त्रिंशत् तिथ्यङ्गाङ्गमुनीषवः।
नाड्यो व्याघातपूर्वाणामन्ते तावद्विवर्जयेत्।

इति। इह केचित् प्रान्तोष्विति प्रथमेऽन्त्ये चेत्याहुः।

तथाच विधिरत्ने—

विष्कम्भे घटिकेन्द्रियाणि नवकं वज्रातिगण्डाख्ययो-
र्नाड्यस्सप्त च शूलके रसघटीर्व्याघातगण्डाख्ययोः।

योगादौ घटिका इमा विषसमा वर्ज्या व्यतीपातकं
सत्यं वैधृतिरर्धभं च परिघं वर्ज्यं च योगद्वयम् ॥ इति ।

श्रीपतिश्च—

अनिष्टसंज्ञा इह ये च योगा-
स्तेषामनिष्टः खलु पाद आद्यः ।
सवैधृतस्तु व्यतिपातनामा
सार्वेऽप्यनिष्टः परिघस्य चार्धम् ॥
तिस्रस्तु योगे प्रथमे सवज्रे
व्याघातसंज्ञे नव पञ्च शूले ।
गण्डेऽतिगण्डे च षडेव नाड्य-
श्शुभेषु कार्येषु विवर्जनीयाः ॥ इति ।

अन्ये त्वाहुः—

अर्कं निधाय तस्मात्तत् त्यक्त्वा भं यत् प्रदृश्यते ।
तस्मादुभयतस्तावन्नाड्यस्त्याज्या इति स्थितिः ॥

इति । दुष्टान् वारातिथियोगानाह—

अर्कस्याहुस्तर्ककुलाद्र्यर्कचतुर्थ्यः
प्रालेयांशोश्शूलधरोर्वीधरषष्ठ्यः ।
क्षोणीसूनोर्भूतभुजङ्गाद्रिदशम्यो
नेत्रक्षोणीनागनवम्यश्शशिसूनोः ॥ १७ ॥

वागीशस्याहस्करनन्दाद्विपषष्ठ्यः
काव्यस्याक्षिस्थाणुदिगङ्गाहितनीयाः ।

सौरस्येर्विंशातिजगत्यस्सनवम्य-
त्स्याज्या युक्ता स्सन्ततमेते तिथिवाराः ॥ १८ ॥

अर्कस्य षष्ठीसप्तमीद्वादशीचतुर्थ्यः, चन्द्रस्यैकादशीसप्तमीषष्ठ्यः, कुजस्य पञ्चम्यष्टमीसप्तमीदशम्यः, बुधस्य द्वितीयाप्रतिपदष्टमीनवम्यः, गुरोः द्वादशीनवम्यष्टमीषष्ठ्यः, शुक्रस्य द्वितीयैकादशीदशमीनवम्यष्टमीतृतीयाः, शनेः प्रतिपदेकादशीत्रयोदशीनवम्यः, एषां वारा एताः तिथयश्च युक्ताश्चेत् त्याज्या भवन्ति ।

तथाऽत्रिः —

षष्ठ्यादितिथयस्सप्त चन्द्रवारादिभिर्युताः ।
पक्षयोरग्निदास्त्वेता वारेशो बलवान्न चेत् ॥

इति । गुरुः—

षष्ठी च सप्तमी चैवमष्टमी नवमी तथा ।
द्वादश्येकादशीयुक्ता त्रयोदश्यर्कतो विषाः ।
बुधे द्वितीया कुजपञ्चमी च षष्ठी गुरोः शुक्रदिनेऽष्टमी च ।
एकादशीन्दौ नवमी च मन्दे द्वादश्यथार्के तिथिदग्धयोगाः ।
षष्ठीशशाङ्के नवमी च शुक्रे बुधे तृतीया तपने चतुर्थी ।
जीवेऽष्टमी सौरिदिने च सप्तमीयोगा विषाख्या दशमी च भौमे ।
प्रतिपद्बुधवारेण सप्तमीनदिनेन च ।
द्वावेतौ वर्षशूलाख्यौ वर्जनीयौ सदा शुभे ।
द्वितीया च तृतीया च दग्धा स्यात् भृगुसूनुना ।

इत्यादि द्रष्टव्यम् ।

तत्फलं गुरुणोक्तं—

दग्धयोगे कृतं सर्वं कुलं विश्वं विनाशयेत् ।
यथाऽग्नौ पतितास्तोयबिन्दवो महतोऽप्यमी ।
दग्धुर्विवाहे वैधव्यं यात्रायां मृत्युमेव च ।
अग्निदाहो गृहारम्भे प्रवेशे स्वामिनो मृतिः ।
विषयोगे कृतं सर्वं कर्तृकर्मविनाशनम् ।

प्रतिपदर्कादिगततिथिवारसङ्ख्यायोगे त्रयोदशमिते क्रकचो नाम ।

तथा च नारदः—

त्रयोदश स्युर्मिळने सङ्ख्यायास्तिथिवारयोः ।
क्रकचो नाम योगोऽयं मङ्गलेष्वतिगर्हितः ।

इति । वारर्क्षयोगानाह—

पितृयमवसुमैत्रेन्द्वग्निशूर्पाश्विनीन्द्रैः
गुरुजलपितृशूर्पत्वाष्ट्रमैत्रोत्तराभिः ।
अहिगिरिशविशाखाशक्रपौष्णाम्बुषट्कै-
र्वसुनिरृक्रातियमाश्विन्यन्त्यभाद्राह्विदेवैः ॥१९॥

भगजलपतिरोहिण्यग्निरुद्रेन्दुचित्रै-
र्मरुदजयमशूर्पार्धर्क्षपुष्याहिपित्र्यैः ।
रविगुरुभगमातृत्वाष्ट्रतोयत्रयान्त्यैः
शुभकृतिषु विनिन्द्या वारयोगाः क्रमेण ॥२०॥

उत्तरास्तिस्रः, अम्बुषट्कं—पूर्वाषाढादिषड्भानि, अर्धर्क्षाणि, सौम्यचित्राश्रविष्ठाः, तोयत्रयं—पूर्वाषाढादित्रिभानि । रवेर्मखायमव

सुमैत्रसौम्यकृत्तिकाविशाखाश्विनीज्येष्ठाभिर्नवभिः । इन्दोः पुष्याऽऽ-
र्यमखाशूर्पाचित्रामैत्रोत्तरात्रयैः । कुजस्य सार्पार्द्राशूर्पज्येष्ठान्त्यैः पूर्वा-
षाढादिषड्भैश्चैकादशाभिः । बुधस्य वसुमूलयाम्याश्विनीपौष्णभाद्र-
विशाखाभिः सप्तभिः । गुरोः भाग्यवारुणरोहिणीकृत्तिकाचित्रासौ-
म्याऽऽर्द्राभिः । शुक्रस्य स्वातीरोहिणीभरणीशूर्पसौम्याचित्राश्रविष्ठापु-
ष्याऽऽश्लेषामखाभिर्दशाभिः । शनेर्हस्ततिष्यभाग्यमातृचित्राऽषाढाद्वयश्र-
वणरेवतीभिर्नवभिः । एतैर्नक्षत्रैरर्कादिवारयोगाश्शुभकर्मसु निन्द्यास्स्युः ।

अत्र भरद्वाजः—

सूर्ये मखा चन्द्रदिने विशाखा
कुजे तथाऽऽर्द्रा शशिजे च मूलं ।
जैवे दिने वारुणरोहिणी च ।
शौक्रे मन्दे वैश्वदेवं च शून्यम् ।

नारदः—

यमर्क्षमर्के चन्द्रे तु चित्रा भौमे तु विश्वभम् ।
बुधे श्रविष्ठार्यऽमर्क्षं गुरोर्ज्येष्ठा भृगोर्दिने ।
रेवत्यैनेऽपि नाडीनां क्ष्वेळयोगा भवन्त्यमी ।

इह अर्यमर्क्षं—उत्तरफल्गुनी ।

विशाखादिचतुर्वर्गो रविवारादिषु क्रमात् ।
उत्पातमृत्युव्याध्याख्या योगाश्चामृतसंयुताः ॥

गार्ग्यः—

चन्द्रेऽश्विनी रवौ सौम्यं [1]रौद्रे बौधे करश्शनौ ।
भृगौ मखा कुजे चित्रा ज्येष्ठा जीवेऽर्थनाशनाः ।

---

[1] रौद्रं चैव.

गुरुः—

दस्त्रमैत्रपुनर्वस्वो भाद्रपादाग्निचित्रभाः ।
अषाढं च क्रमादर्काद्योगा विषसमाह्वयाः ।

गार्ग्यः—

आश्लेषाऽर्केऽर्यमा चन्द्रे कुजे याम्यं तथैव च ।
चन्द्रसूनौ तथा चाऽऽप्यं गुरौ शूर्पर्क्षमेव च ।
भार्गवेऽदितिदैवत्यं सौरे श्रवणमेव च ।
मृतिश्च पचनं व्याधिः कलहो राजपीडनम् ।
अनिष्टयोगनामानो निन्दिताश्शुभकर्मसु ।
पूर्वाषाढाव्ययरेवत्यौ विशाखावरुणेश्वरौ ।
याम्यं पुष्यं च भौमाद्यैः मृत्युयोगाः पदैः क्रमात् ।

विधिरत्ने—

सौरेर्वारयुतो हरिः श्शतभिषक् शुक्रेण वेधोऽनिलं
जीवेनैन्दवभं मखा रवियुता तिष्येण चेन्दोर्दिनम् ।
फल्गुन्युत्तरचित्रभे शशिसुते भूम्यात्मजेनाग्निभं
याम्यं वै यमकण्टकाद्विषसमा योगास्तु तान् वर्जयेत् ।

गुरुः—

मैत्रचित्राऽग्निदेवत्यविशाखावसुदेवताः ।
यद्यर्कवारसंयुक्ताः दोषा हालाहलोपमाः ।
त्रीण्युत्तराणि पैत्रान्त्यविशाखाविधुवारगाः ।
पूर्वाभाद्रपदं ज्येष्ठा शूर्पश्रवणवारुणं ।
धनिष्ठा सर्पदैवं च भौमवारेण वर्जयेत् ।

कर्तुः कर्म ।

कृत्तिका सार्पमैत्राणि धनिष्ठा तिष्यरोहिणी ।
चित्रा च पितृदैवत्यं गुरुवारेण वर्जयेत् ।
नैरृतं बुधवारेण विशाखां शुक्रवासरे ।
पुनर्वसू तथा चाऽऽप्यं मन्दवारेण वर्जयेत् ।
एषु योगेषु सर्वेषु विवाहे म्रियते पुमान् ।
यात्रायां सर्वनाशस्स्यात् नवान्नाशनतो मृतिः ।
विद्याऽऽरम्भे भवेन्मूकः कृष्यारम्भे तु निष्फलम् ।
द्वितीयजन्मनि ध्वंसः चूडाकर्मणि नैधनम् ।
गृहारम्भे पतिर्नश्येत् प्रतिष्ठा राज्यनाशनी ।

इति । प्रतिष्ठाविषये विशेष उक्तः—

अश्विनीकृत्तिकाहस्तान् बुधवारेण वर्जयेत् ।
भृगुवारेण तिष्याख्यश्रवणौ मरणप्रदौ ।

अत्रिः—

सूर्यादेस्सूर्यवाराद्यैः जन्मतारास्समन्विताः ।
शुभकर्तुर्मृत्युदास्ताः शुभदृष्टियुता अपि ।

इति । ग्रहजन्मताराश्चान्यैरुक्ताः—

याम्ये तमोऽर्कः श्रवणे रविस्तु
जातो विशाखासु सितश्च पुष्ये ।
[1] पौष्णेऽप्यभाग्योरगकृत्तिकासु
मन्दारवागीशशिखीन्दुजन्म ॥

इति । तिथिवारर्क्षयोगानाह—

पञ्चम्या सह कृत्तिका दिनकरे चित्रा द्वितीये

[1] पुष्ये

विधौ राका धातृयुता कुजे शशिसुते याम्यान्विता सप्तमी। जीवे मैत्रयुता त्रयोदशतिथिः श्रोणा सषष्ठी भृगौ मन्दे पौष्णयुताऽष्टमीति गदिता योगा विषाख्या इमे ॥ २१ ॥

राका—पूर्णिमा, सूर्यादिवारेषु पञ्चम्यादितिथयः कृत्तिकादि-नक्षत्राणि च यदि संयुज्यन्ते विषयोगास्ते स्युः।

तथाच गुरुः—

अर्काग्न्योः पञ्चमीयुक्ता षष्ठीश्रवणभार्गवाः।
बुधे तु सप्तमी याम्यं शनौ पौष्णयुताऽष्टमी।
सोमे द्वितीया चित्रा च कुजे पूर्णेन्दुरोहिणी।
गुरौ त्रयोदशी मैत्रं विषा हालाहलोपमाः।
एतेषु विषयोगेषु न कुर्यात् शोभनं बुधः।
शत्रुमारादि कुर्वीत शापव्रतसमाप्तिकम् ॥

तिथ्यृक्षयोगानाह—

तिथयः क्रमेण काष्ठात्रयोदशमहीरवीषुवसु-सङ्ख्याः। विधिभगजलभुजगानलभाद्रयुतास्त्वृ-क्षलूचि(ञ्जि)नामानः ॥ २२ ॥

शुभेषु चित्राद्वयमुत्तरात्रयं
मैत्रं मखां वैधसमर्कनैरृते।
त्रयोदशाग्निद्विशराष्टसप्तमी-
तिथ्यन्वितानि क्रमशो विवर्जयेत् ॥ २३ ॥

काष्ठा–दश । चित्राद्वयं–चित्रास्वात्यौ । वैधसं—रोहिणी । दशम्यादिषट्तिथयो रोहिण्यादिषड्भैर्युक्ताश्चेत् ऋक्षलूञ्जिनामानो दोषास्स्युः । तथा चित्राद्वयादिषट्पदोक्तानि त्रयोदश्यादिषट्तिथिभिः युतानि चेत् दोषास्स्युः, तान् वर्जयेत् ।

अत्र गुरुः—

प्रतिपत्पूर्वमाषाढं पञ्चमे कृत्तिका तथा ।
पूर्वाभाद्रपदाऽष्टम्या दशम्या रोहिणी युता ॥
द्वादश्या सार्पनक्षत्रमर्यमा च त्रयोदशी ।
नक्षत्रलूञ्जिरित्येते देवानामपि नाशनाः ॥

गार्ग्यः—

अनूराधा द्वितीयायां तृतीयायां त्रिकोत्तराः ।
पञ्चम्यां च मखा युक्ता अष्टम्यां रोहिणी तथा ॥
हस्तमूले च सप्तम्यां चित्रास्वात्योस्त्रयोदशी ।
एषु कार्यं न कुर्वीत कुर्वन् क्षिप्रं विनश्यति ।

उत्तरगार्ग्ये विशेष उक्तः—

'रोहिण्या तृतीया, मृगशीर्षेण षष्ठी, पुष्येण दशमी, अनूराधया द्वादशी, श्रवणेन पञ्चमी, पौष्णेन सप्तमी, इति । तत्रापि यत्कृतं भस्मसाद्भवति ।

इति । गुरुणा प्रतिष्ठायां विशेष उक्तः—

आद्याषाढं च पौष्णं च सप्तमी सहिते यदि ।
द्वितीययाऽश्विनी युक्ता प्रजानां पापहारिणी ॥ इति ॥

तिथिराशियोगानाह—

मकरवणिजौ लेयैणौ स्त्रीयमौ हयकर्कटौ
वशिमृगपती चापान्त्यौ गोझषौ विषमास्वमी।
तिथिषु तु समास्वेते दग्धा भवन्ति झषो वृषः
शशिभमवला कीटो नक्रः क्रमाद्दशमान्विताः॥

प्रतिपदादिविषमातिथिषु सप्तसु मकरतुलाद्यौ द्वौ द्वौ राशी दग्धौ स्तः। द्वितीयादिसमतिथिषु षट्सु मीनादयष्षड्राशयः स्वीयदशमराश्यन्विताः दग्धास्स्युः। एतद्गुरुवाक्येनैवोक्तं भवति—

प्रथमायां तुलानक्रौ तृतीयायां मृगार्कभौ।
पञ्चम्यां सौम्यराशी द्वौ सप्तम्यां चापचन्द्रभे।
लेयकोऽर्पी नवम्यां च एकादश्यां धनुर्झषौ।
वृषमीनौ त्रयोदश्यां दग्धसंज्ञास्त्विमे गृहाः।
जीवर्क्षे द्वे द्वितीयायां चतुर्थ्यां घटतावुरू।
षष्ठ्यां कर्कटमेषौ द्वौ बुधक्षेत्रेऽष्टमीयुते।
कोर्पिसिंहे दशम्यां च द्वादश्यां मृगजूकभे।
इमे मृत्युप्रदा योगा लग्ने तिथिषु शोभने।
दग्धसद्मानि यत्कर्म कृतं तद्धर्गनाशनम्॥

इति। तुशब्दोऽनुक्तसमुच्चयार्थः। चतुर्दशीपञ्चदश्योर्दग्धराशयो द्रष्टव्याः। इति।

आत्रिः—

मृगकुम्भे चतुर्दश्यां शून्ये पर्वद्वये हरिः॥

इति । वारलग्नयोगोऽपि कैश्चिदुक्तः—

अर्के वृषो विधौ युग्मं सिंहो भौमे धनुर्बुधे ।
घटो गुरौ झषश्शुक्रे तुला मन्दे विषा इमे ॥

इति । गुरुणा तिथिवारर्क्षयोगोऽप्युक्तः—

कृत्तिकायाम्यरौद्राणि सार्पमैन्द्रभमेव च ।
त्रिपूर्वास्सर्वदा वर्ज्याः सर्वेषु शुभकर्मसु ॥
पापवारयुतेष्वेषु रिक्ताख्यैर्द्वादशीयुतैः ।
षष्ठ्या च सहितेष्वेषु पापांशे पापलग्नके ॥
न कुर्याच्छुभकार्याणि कृतं सर्वं विनश्यति ।
रोगर्णादिभयादीनां कर्तव्यास्स्युः प्रतिक्रियाः ॥
एषु योगेषु शापादि विसृजेद्यस्तु तत्पुनः ।
नाऽऽयाति रोगस्नानादि कृते च न पुनर्भवेत् ॥

इति । अन्ये त्वेवमाहु—

तिथिवारं च नक्षत्रं लग्नं ध्रुवकमिश्रितं ।
तिथिद्वादशदशकं चाष्टकं च चतुष्टयं ॥
ग्रहसङ्ख्यैर्हरेद्भागं पञ्चशेषं तु पञ्चकं ।
रोगो वह्निर्नृपश्चोरो मृत्युश्चेति यथाक्रमम् ॥

इति । अयमर्थः—इष्टकालात् प्राग्गतानि तिथिवारर्क्षलग्नानि संमिश्रच्य पञ्चराशीकृत्य तद्राशिषु पञ्चदशद्वादशदशाष्टचतुस्सङ्ख्याः संयोज्य नवभिर्विभज्य शिष्टेषु पञ्चसङ्ख्या शिष्यते चेत् ते पञ्च दोषाः रोगाग्निराजचोरमृत्युसंज्ञास्स्युरिति ।

अन्ये त्वाहुः—

गततिथियुतलग्नं पञ्चधा कृत्य युक्त्वा
तिथिरविदशनागाम्नायसङ्ख्याः क्रमेण ।

वसुभृतभरशेषं शोभने वर्जनीयं
रुगनलनृपचोरैर्मृत्युना चात्र दुष्टम् ॥

इति । गततिथिषु गतराशीन् संयोज्य पञ्चरशीकृत्य तेषु तिथिरविदशाष्टचतुष्टयानि संयोज्याष्टभिर्विभज्य शिष्टा पञ्चसङ्ख्या चेत् रुगाद्याख्याः पञ्च दोषास्स्युः ॥ इति ।

उडुकूपमाह—

द्विगुणितमनुमुनितिथयः कृतिहयातिथितिथिहरा मनुद्वितयम् । द्विगुणितशक्वर्यंकद्वीपाष्ट्यष्टीशाकृतिशरद्वीपाः ॥ २५ ॥

अत्यष्टिगिरिहरस्वरागिरितिथयो मनुयुगेन्द्रयुगबाणाः । एतत्संख्यास्वन्त्या नाड्यो दस्राऽऽदिभेषु निम्नाऽऽख्याः ॥ २६ ॥

द्विगुणितमनवोऽष्टाविंशतिः । हयास्सप्त । मनुद्वितयं-अष्टाविंशतिः । द्विगुणितशक्वरी—अष्टाविंशतिः । अङ्काः—नव । द्वीपास्सप्त । अष्टिः षोडश । अत्यष्टिः—सप्तदश । स्वराः—सप्त । मनुयुगं—इन्द्रयुगं—अष्टाविंशतिः, अश्विन्यादिषूक्तसङ्ख्यास्वष्टाविंशत्यादिष्वन्त्यास्संख्यापूरण्योऽष्टाविंश्यादयो घटिका निम्नाऽऽख्याः—कूपसंज्ञास्स्युः ॥

तिथिकूपमाह—

**द्वाभ्यां युक्तस्सप्तवर्गस्सतत्वा
बाणाश्शैला आकृतिश्च द्विजाश्च ।**

एतेष्वन्त्या नाडिकाः कूपसंज्ञा
नन्दादीनां निन्दनीयास्तिथीनाम् ॥ ३७ ॥

द्वाभ्यां युक्तस्सप्तवर्गः—एकपञ्चाशत्, सतत्वा बाणाः—त्रिंशत्, शैलाः—सप्त, आकृतिः—द्वाविंशतिः, द्विजाः—द्वात्रिंशत्, एतास्वन्त्यास्सङ्ख्यापूरण्यः—एकपञ्चाश्याद्या घटिकाः नन्दादितिथीनां संबन्धिन्यः कूपसंज्ञास्स्युः ।

तिथिकारककूपनिम्ननाडी-
मभितो द्वे घटिके विवर्जनीये ।
अवमत्य नरस्तदन्तराळे
विचरन्कूप इवावपातमेति ॥ २८ ॥

तिथिनक्षत्रयोः कूपाख्यनाडीमभितः—पुरतः पश्चात् एकैकेति—द्वे घटिके त्याज्ये स्तः । यथा—कूपमनादृत्य तन्मध्ये चरन् कूपे पतति तद्वत् कूपघटिकायां शुभं कुर्वन् तत्कर्मभ्रंशमाप्नोति ।

तथाच गार्ग्यः—

ऋक्षकूपे ध्रुवं मृत्युः तिथिकूपे धनक्षयः ।
तस्मात्कूपं परित्यज्य कर्माभ्युदयमाप्नुयात् ॥ इति ।

अश्विन्यामष्टाविंशी एकोनात्रिंशी च द्वे घटिके कूपाख्ये स्तः

केचिदाहुः—

निगदितनाडिकान्तः कूपः तदुभयतो द्वे इति चतस्र इति ।

तथा च सर्वसिन्धौ—

हरिस्सूनुश्शुको नेत्रं सेना मान्था शुकः कपिः ।
हरो हरिर्धनी सूनुः तपस्तुत्यं वपुर्नरः ।
मुनि(शनि)स्सूनुस्सुकृत्सूनुः पटुस्सूनुस्सानिर्मयः ।
[1]मुखीदारामनश्चेति निम्नान्यश्वचादितस्त्यजेत् ।
केशो भगस्सानिः क्रूरः खलो नन्दादिषु क्रमात् ।
निम्नानि वर्जयेत् पश्चात् पुरश्चैषां घटीद्वयम् । इति ।

काळदोषमाह—

शनैश्चरात्सप्तममृक्षमाहुः
काळं बुधास्तं कथयन्त्यथान्ये ।
अर्कादिवारेष्वहिभूरसेन्दुने-
त्राम्बुराशीक्षणसंख्यमंशम् ॥ २१ ॥

शनैश्चर इति तदाक्रान्तमृक्षमुच्यते । एवं सर्वत्र ग्रहाभिधाने तदाक्रान्तमृक्षं ग्राह्यम् । शनैश्चराक्रान्तर्क्षात् सप्तममृक्षं काळमाहुः ।

तथाचाऽऽहुः—

मन्दाद्विंशतिभं गण्डं सप्तमं काळसंज्ञिनम् ।

इति । अन्ये काळदोषमर्कादिवारेष्वष्टमप्रथमषष्ठाऽऽद्याद्वितीयचतुर्थद्वितीयांशमाहुः ।

अंशो दिनाष्टभागः ।

अत्राऽऽहुः—जयतिपुरवीरः काळदोषश्च वर्ज्यः ॥ इति ।

---

[1] दुःखि.

चक्रार्धव्यतिपातमाह—

चक्रार्धव्यतिपातमाहुरिह तच्छिष्टं यदृक्षं रवौ पाथोनेंऽशकतोंऽशकार्धसहितात्त्यक्ते त्रयोविंशतः (तेः)। अन्ये यावदिनाद्भवत्यादितिभं तावत्ततस्तं विदुस्सर्वे तं समये स्वकीयगणितप्राप्ते विनिश्चिन्वते॥

[1] पाथोनेंशकन्यायामंशकन्यायनार्धेन त्रिंशाल्लिप्ताभिस्सहितात् त्रयोविंशादंशात् तात्कालिकेऽर्के त्यक्ते यदृक्षं शिष्यते तदिह चक्रार्धव्यतिपातं नामाऽऽहुः। अपिच सार्धात् कन्यात्रयोविंशाच्च चक्रार्धं व्यतिपात्य तस्मात् मीने सार्धत्रयोविंशांशात् अर्के त्यक्ते शिष्टमृक्षं च तद्दूषणमाहुः।

यद्यप्यंशकार्धसाहितादित्यांशकः (?) त्र्यंशसहितादिति वक्तव्यं, तत्रैव तस्योपक्रमात् इदं तु पादोनघटिकामात्रमधिकम्। तथाऽप्यल्पान्तरमित्येवमुक्तम्।

अन्ये—गुर्वादय एवमाहुः—इनात् सूर्यर्क्षादारभ्य अदितिभं यावत्सङ्ख्यं भवति तस्मात् तावत्सङ्ख्यं व्यतिपातमिति। नक्षत्रादिमुपक्रम्य यावती घटिकाऽर्केण भुज्यते नक्षत्रान्तात् वैलोम्येन तावत्यां घटिकायां पातोपक्रमः। अपिच अदितिः—इन्द्रमाता, इन्द्राश्चतुर्दश, तन्मातरश्च तावत्य इत्यदितिशब्देन चतुर्दशसङ्ख्याऽभिधीयते, चतुर्दशं भं—चित्रानक्षत्रं, सूर्यर्क्षाद्यावद्भवति तस्मात् तावत्सङ्ख्यं च व्यतिपातमिति।

---

[1] पाथोनेंऽशकतः—कन्यायामंश,

तथाचाऽऽहुः—

[1]धीराङ्गनामवाक्यात्तु तात्कालिकरविं त्यजेत् ।
चक्रार्धाख्यव्यतीपातो गणितेन स्फुटो भवेत् ॥

इति । अपिच—

अर्कात्पुनर्वसू यावत् तावत्ताद्दिवसावुभौ ।

इति । स्वकीयगणितेन—सिद्धान्तप्रोक्तेन, प्राप्ते काले व्यतीपा सर्वेऽप्याचार्या विनिश्चिन्वते । निश्चयेन वदन्ति । अन्यदेतत् स मुद्देशवदिति ।

तथाच गुरुः—

महागणितमार्गस्थो व्यतीपातोऽतिदोषदः ।
बलवद्गुणसंपन्नेऽप्यसौ कुलविनाशनः ॥

इति । तन्मध्यकालो रल्लेनोक्तः—

तुल्येऽयने भिन्नदिशो रवीन्द्वोस्स्याद्वैधृतश्चक्रसमे समासे ।
भिन्नेऽयने तुल्यदिशोश्च योगे चक्रार्धतुल्ये व्यतिपातयोगः ।

इति । तत्स्फुटीकरणाय रवीन्दुयोगं कृत्वा तत्र चक्रार्धहीनाधिव लिप्तापिण्डं रवीन्दुभोगयोगेनाऽऽप्तं दिनादिकालेनैष्यता गतेन वा पात मध्यकालो भवति । तत्र रवीन्दुपातांस्तद्योगैस्तात्कालिकीकृत्य रवीन्द्वो रयनांशात् सं(युज्य)योज्य भुजाक्रान्तिः कार्या । यथा—

भगीरसुर्द्धी सवनी वनार्थिनी जने घनं धेहि नयं जगत्प्रिये ।
सहाऽऽलये तापभयं नभोभयं रवीन्दुबाहादशभागजावमाः ।

अयमेव रवेः स्फुटावमः—

शशिनस्तु पातं विशोध्य भुजाक्षेपः कार्यः । यथा—

---

[1] धिरागरामवाक्यात्तु.

सर्वज्ञबुधान(?)शालिकां वासाथ सुनारिवागुराम् ।
भूमीन्द्रततश्रीनः सुखं दोःक्षेपकलादशांशजाः ।

चन्द्रावमक्षेपयोरेकादिशोर्योगं भिन्नदिशोर्वियोगं कृत्वा तदवमश्च स्फुटो भवति । तत्र विषमपदस्थस्येन्दोरर्कावमाद्यदोनस्तदा भावी, यदा पातकालाधिकस्तदाऽतीतः । अथ समपदस्थस्य व्यस्तमिति ज्ञात्वा वैधृतपातकाले विचार्यमाणेऽर्केन्दुस्फुटावमयोः समदिशोर्योगो भिन्न-दिशोर्वियोगः कार्यश्चक्रार्धपातकाले, अन्यथा स प्रथमो राशिर्भवति । अथ यदा पातकालोऽतीतस्तदा तत्कालात्पूर्वं यदा भावी तदोर्ध्वं काभिश्चिदिष्टघटिकाभिरर्केन्दू तात्कालिकौ कृत्वा प्राग्वत्तयोः स्फुटाव-मावानीय पातकालस्य गतगम्यतां विचार्य प्राग्वत्तयोर्योगो वियोगो वा कार्यः । द्वितीये उभयत्रापि पातकाले गते वा गम्ये वा सति प्रथमद्वितीयराश्योर्वियोगः । एकत्र गतेऽन्यत्र गम्ये सति योगः । स चेष्टघटिकाहतस्य प्रथमस्य छेदः । आप्तं घटिकादि, ताः पात-नाड्यः पूर्वपातमध्यकालात् गता गम्या वा स्युः, ताभिरर्केन्दू तात्का-लिकौ कृत्वा प्राग्वत् तत्स्फुटावमयोरानीतयोर्यदि साम्यं संपद्यते तदा स एव स्फुटपातकालः, अथ न चेत् तदा तदवमाभ्यां प्राग्वत् गतैष्यत्वविचारणादिना द्वितीयो राशिः कार्यः, पातनाड्यः इष्टघटिकाः प्राक्तन एव प्रथमराशिः । तैरपि प्राग्वत् स्फुटपातकालस्साध्यः एवं यावदर्केन्द्वोः स्फुटावमसाम्यं संपद्यते तावत्कार्यं स स्फुटपातमध्यमकालः । पातस्थित्यर्धहीनस्तदुपक्रमकालः, पातस्थित्यर्धयुतस्तद्विरामकालस्स्यात् ।

यथोक्तं सूर्यसिद्धान्ते—

पातकालस्स्फुटो मध्यः सोऽपि स्थित्यर्धवर्जितः ।
तस्य संभवकालस्स्यात् तद्युक्तोऽथान्यसंज्ञितः ।

आद्यन्तकालयोर्मध्यकालो ज्ञेयोऽतिदारुणः ।
प्रज्वलज्ज्वलनाकारस्सर्वकर्मसु गर्हितः

इति । पातस्थित्यर्धानयनं च तत्रोक्तं—

रवीन्दुमानयोगार्धं षष्ट्या संगुण्य भाजयेत् ।
तयोर्भुक्त्यन्तरप्राणैः स्थित्यर्धं नाडिकादिकम् ॥

इति । अथ यदैव माने नीयमानमप्यपक्रमसाम्यं न संपद्येत तदा पाताभावः, यदा तु द्विरुत्पद्यते तदा द्विः पातो भवति । तथा च सिद्धान्ते—

रवीन्द्वोस्तुल्यता क्रान्त्योर्विषुवत्सन्निधौ यदा ।
द्विर्भवेत् द्विस्तदा पातः स्यादभावो विपर्यये ॥

इति । पातकृत्यमाह—

यत्र चक्रार्धयोगो भवेत्तद्दिनं
दानयोग्यं शुभेषूत्सृजेत् कर्मसु ।
तच्च तस्मादधश्चोत्तरं चाशुभं
वासराणां त्रयं केचिदाचक्षते ॥ ३१ ॥

एवं गणितानीतचक्रार्धयोगो यत्र दिने भवति तद्दिनं कृत्स्नं दानयोग्यं । तथा च सिद्धान्ते—

स्नानदानतपश्श्राद्धव्रतहोमादिकर्मसु ।
प्राप्यते सुमहच्छ्रेयस्तत्कालज्ञानतस्तथा ॥

इति । स्मृतौ च

शतमिन्दुक्षये दानं सहस्रं तु दिनक्षये ।
विषुवे शतसाहस्रं व्यतीपातेष्वनन्तकम् ॥

इति । शुभेषु कर्मसु—विवाहादिषु वर्जयेत् ।

तथा च नारदः—

यस्मिन् दिने महापातस्तद्दिनं वर्जयेत् शुभे ।
अपि सर्वगुणोपेतं दम्पत्योर्मृत्युदं यतः ॥

इति । पातकाल एवेदमिति केचित् ।

तथाच ब्रह्मगुप्तः—

रविबिम्बमेकमार्गाच्छशिबिम्बापक्रमात् भवति यावत् ।
तावत्फलं तदुक्तं तदभावे तत् फलाभावः ।

इति । पातयोगो यत्र दिने भवति तद्दिनं तद्दिनादधोदिनं उत्तरदिनं चेति वासरत्रयमशुभमिति केचित्—वराहमिहिराद्य आहुः । तथाच तद्वाक्यं—

एष्यो धनं क्षपयति व्यतिपातयोगो
मृत्युं करोति नचिरादपि वर्तमानः ।
सन्तापशोकवधबन्धकरस्त्वतीत-
स्तस्माद्दिनत्रयमिदं प्रजहीत विद्वान् ।

ननु पातोपक्रमविराममध्यकाल एव त्याज्यः, न दिनत्रयं । यतस्तत्रैवार्केन्दुराश्मिसंघट्टाद्वह्निर्जायते ।

तथाच सिद्धान्ते—

तुल्यांशुजालसम्पर्कात् तयोस्तु पवनाहतात् ।
तद्क्रोडभवो वह्निर्लोकाभावाय जायते ।

इति । अन्यत्रांशुसम्पर्काभावात् तदभावः, तस्माद्दिनत्रयं न दुष्टं ।

उक्तंच श्रीपतिना—

भानोर्बिम्बं तुहिनकिरणापक्रमं चैकदिक्कं

याववत्ताभिर्मुनिभिरुदितस्संभवस्तत्फलस्य ।
तस्याभावे भवति नियतं तत्फलस्याप्यभावो
यात्रोद्वाहादिषु पुनरिह ह्युत्रयं नैव दुष्टम् ॥

इति । नैतत्सारं, तुच्छत्वात्, बहुसिद्धान्तभेदेनाकुलत्वाच्च तस्मात् स्फुटकालममितास्त्रिंशन्नाड्य इति ; षष्टिनाडीमितमेकदिनं त्याज्य मित्याचार्यस्य मतम् । चक्रार्धयोग इति वैधृतयोगग्रहणम् । चक्रयोगे वैधृतस्तदर्धयोगो व्यतीपातः ।

यद्वा चक्रार्धयोर्द्वौ योगौ स्तः । एको व्यतीपातः अन्यो वैधृत तेन समावित्यर्थः ।

तथाच वराहमिहिरः—

व्यतिपातगतं दिनत्रयं
व्यतिपातेन समश्च वैधृतः ॥

इति । सिद्धान्तेऽपि—

व्यतीपातः प्रसिद्धो यः संज्ञाभेदेन वैधृतः ।

इति । अथ केचित् व्यतीपातपञ्चकमाहुः ।

तथाच वराहमिहिरः—

व्यातिपाताद्व्याघातः षष्ठे दशमे च वैधृतं धिष्ण्ये
विक्षोभणगण्डान्तावतिधृतिसङ्ख्ये च विंशे च ।
तदिदं व्यातिपातपञ्चकं कथयन्त्युत्तरसंज्ञिता जना
व्यातिपातवदाकुलं स्थितं बहुसिद्धान्तविभेदकारणैः ॥

इति । अन्ये च सप्त दोषा व्यतीपातसमा गुर्वत्रिभ्यामुक्ताः ।

यथा—

अर्केन्दुस्फुटयोगर्क्षाद्द्वितीयं नवमं च भं ।

षष्ठं त्रयोदशं चाष्टादशमेकादशं तथा ।
एकोनविंशं नक्षत्रं एते चाऽऽशीविषोपमाः ।
विरोधः परिघो वज्रं दण्डं खड्गं च शूलकम् ।
व्यतीपात इति ख्याताः सर्वे चाऽऽशीविषोपमाः ।
अपवादैर्न भिद्यन्ते बलिभिर्वा गुणैरपि ॥

इति । कण्टकस्थूणदोषानाह—

अर्कक्षोणीसुताभ्यां भवति गणनया नैरृतं यावदृक्षं तावत्यौ तारके द्वे क्रमश इह मते कण्टकस्थूणसंज्ञे । तभ्यामामूलसंख्याद्वययुतिगणितः कण्टकस्थूणनामा रक्तस्थूणोऽवशिष्टः क्षितिसुररहिते सिंहधृत्यंशके स्यात् ॥ ३२ ॥

अर्ककुजाक्रान्तनक्षत्राभ्यामारभ्य गणनया मूलनक्षत्रं यावत्सङ्ख्यं भवति तस्मात्पुनर्मूलात् प्रभृति तावत्सङ्ख्ये नक्षत्रे क्रमेण कण्टकस्थूणसंज्ञे भवतः । तत्रार्कात् कण्टकदोषः । कुजात् स्थूणदोषः । अर्कारौ तारादेः क्रमेण चरतः दोषौ तु तारान्तादुत्क्रमेणेति अर्काराक्रान्तताराभ्यामारभ्यामूलगणिते ये सङ्ख्ये तयोस्सांमिश्रणाद्या सङ्ख्या संपद्यते मूलादारभ्य गणितस्तावत्संख्यनक्षत्रगतः कण्टकस्थूणदोषस्स्यात् । सिंहेऽष्टादशांशकेभ्यः कुजस्फुटं विशोध्यावशिष्टतारागतो रक्तस्थूणदोषः स्यात् ।

अत्रात्रिगुरू—

यावदर्कात्तु नैरृत्यं तावन्नैरृतभात् विषं ।
कण्टकाख्यः कुजाच्चैवं स्थूणाख्यः शुभनाशनः ।

भौमार्कसहिताद्दक्षाद्यावन्नैरृक्तभं तयोः ।
संख्याद्वययुतौ मूलात् कण्टकस्थूणसंज्ञितः ।
एषु त्रिष्वपि दोषेषु कृतं सर्वं विनश्यति ।
सत्स्वपि स्वापवादेषु बलवत्सु गुणेषु वा ।
कलाद्ये ज्ञानदीपाघे कुजस्फुटगतिं त्यजेत् ।
शिष्टमङ्गारकस्थर्क्षं रक्तस्थूणं शुभे त्यजेत् ॥

इति । अर्काक्रान्तनक्षत्रादाश्लेषादिषण्णक्षत्राणि यावत्संख्यानि स्युः अश्विभात्तावत्संख्यं हरास्त्रमिति केचिदाहुः ।

तथा च रत्नः—

दिनकरयुताद्भादाश्लेषामखाश्रवणस्तथा
निरृतिभमथो चित्रा मैत्रं क्रमादथ यावति ।
पतति ततमे चन्द्राक्रान्ते हरायुधमाश्विभात्
किमपि हि शुभं कार्यं न तत्र विचारणे ।

इति । मृत्युदोषानाह—

व्ययेऽर्को राहुर्वा रिपुनिधनयोः शीतकिरणः सुरेड्यो वा धर्मे धरणितनयः खे शशिसुतः । कविर्यस्य द्यूने वसति तनये सूर्यतनयो गृहं तन्मृत्य्वाख्यं निखिलशुभकार्येषु विसृजेत् ॥ ३३ ॥

इष्टलग्नस्य द्वादशभावे यद्यर्को राहुर्वाऽवतिष्ठते; तथा षष्ठाष्टमयोश्चन्द्रो गुरुर्वा, नवमे कुजः, दशमे बुधः, सप्तमे शुक्रः, पञ्चमे मन्दस्तिष्ठति तल्लग्नं मृत्युसंज्ञं सर्वशुभकार्येषु विसृजेत् । एतेऽष्टौ

मृत्युयोगाः, न त्वेकः। अन्यथा व्ययस्थेऽर्के बुधशुक्रौ सप्तमयोः कथं स्तः।

अत्र गुरुः—

पुत्रस्थं भानुसूनं परिहर सततं भार्गवं सप्तमस्थं
जीवं षण्मृत्युसंस्थं नवमदशमयोर्भौमसौम्यौ क्रमेण।
चन्द्रं षष्ठाष्टमस्थं दशशतकिरणं द्वादशस्थं ससर्पं
संप्रोक्ता मृत्युयोगा मरणभयकराः कीर्तितास्सर्वकार्ये॥

इति। गुरोष्षडष्टान्त्यस्थे चन्द्रे शकटो नाम दोषः।

गुर्वत्री—

गुरुस्थानात्तु शीतांशौ षडन्तं संश्रितेऽष्टमं।
योगोऽयं शकटो नाम वधं दद्यात् शुभे युतः।

इति।

दद्युश्चित्राशूर्पचक्रांबुविष्णु-
क्षीराधीशा बुध्नयदस्रान्तराश्च।
धाता रुद्रो देवसूरप्यजाद्यै-
र्मासैर्युक्ता वत्सरार्धेन मृत्युम्॥ ३४॥

क्षीराधीशो—वरुणः, चित्राद्या द्वादश तारका मेषाद्यैर्द्वादशभिः सौरमासैर्युक्ता वत्सरार्धेन षड्भिर्मासैर्मृत्युं दद्युः। मेषादिमासेषु चित्राद्या मृत्युसंज्ञा इत्यर्थः।

अत्र गार्ग्यः—

अजे चित्रा वृषे शूर्पं यमे ज्येष्ठाऽम्बु कर्कटे।
श्रवणास्सिंहमासे स्यात् कन्यायां शततारका।

अहिर्बुध्न्यं तुलायां च वृश्चिके त्वाश्विनी तथा ।
धनुषो भरणी चैव मकरस्य तु रोहिणी ।
रौद्रर्क्षं कुम्भमासे तु मीनमासे पुनर्वसू ।
शून्यऋक्षा न कर्तव्याश्चण्मासे मरणप्रदाः ।

इति । अन्धभान्याह—

अर्कारूढभनाडिकामुभयतो रामाग्निषट्तारका नाड्योऽन्धैकदृगक्षियुग्मकलिताः काणास्तु तिस्रः पराः । वारान् भानि च तद्दिनान्तमभियुज्याङ्का प्तशिष्टास्सदृक्काणान्धा युगलोकलोचनमितास्ताराः प्रदिष्टाः परैः ॥ ३५ ॥

त्रिशिखामिकामृज्वीं नाडीं विलिख्य तद्ग्रेदिनीर्द्वादश तिरश्चीर्लिखेत् । तदृजुनाडीमूले अर्काक्रान्तर्क्षं विन्यस्य ततः क्रमेण नाड्यग्रेषु साभिजिन्ति भानि न्यस्यान्धत्वादीनि निरूपयेत् । तत्रार्काक्रान्तभमन्धं तदुभयपार्श्ववर्तिनाडीत्रयगतान्यन्धानि, तत्परस्स्थितनाडीत्रयगान्येकनेत्राणि, ततः परं षण्णाडीगतानि द्विनेत्राणि । ततः ऋजुनाडीत्रिशिखांशकान्येकनेत्राणि स्युः ।

तथाच सर्वसिद्धौ—

एकं त्रिकं त्रिकं षट्कं त्रिकं षट्कं त्रिकं त्रिकम् ।
अन्धान्धकाणदृक्काणदृक्काणान्धा रवेः क्रमात् ॥

इति । अन्ये त्वाहुः—

अर्कादीन् गतवारानश्विन्यादीनि गतभानि च तद्गतमानादिनक्षाभ्यां सह संयोज्य नवभिर्विभज्य शिष्टाश्चतस्रश्चेत् तद्भूना द्विनेत्रा

स्स्युः । तदूर्ध्वं तिस्रः काणाः, तदूर्ध्वं द्वे यद्यन्धास्तारा स्स्युरिति । तथाचोक्तम्—

अर्कपूर्वाश्विनीपूर्वा धेनुभक्तावशेषिताः ।
द्व्यक्षकाणद्विनेत्रास्स्युराभाण्डारादनुक्रमात् ॥ इति ।

गुरुराह भास्करादीन् वारान् त्रिघ्नान् विशोधयेद्भगणात् । शेषे नवरविरसमिततारा: काणद्विलोचनान्धाख्याः ॥ ३६ ॥

गुरुरन्धादिभान्येवमाह—अर्कादीन् गतवारान् वर्तमानवारसहितान् त्रिगुणान् सतो भगणात् नक्षत्रमण्डलाद्विशोध्याश्विनीमादितः कृत्वा तावत्संख्यानि भान्यतीत्य परतश्शिष्टे भचक्रे नव ताराः काणाः, ततो द्वादश द्विलोचनाः । ततष्षडन्धा भवन्ति । उक्तं च—

वारानर्कादितस्त्रिघ्नानादौ संशोध्य चक्रतः ।
ततो नवार्कषट्तारा: क्रमात् काणद्विदृक् विदृक् ॥

इति । अत्र केचिदाहुः—

त्रिघ्नानर्कादिवारान् भचक्राद्विशोध्यावशिष्टसंख्याग्रगतान्नक्षत्रादारभ्य काणादयस्स्युरिति, तदसत्—अनिष्टभानामन्धत्वापत्तेः, तथाहि—सूर्यवारे त्रिघ्नगतवारविशुद्धभचक्रविशिष्टसंख्याग्रगतं पूर्वाभद्रर्क्षं तस्मादारभ्य काणादिगणनया मूलादीनां षण्णामन्धत्वं समापद्येत । तच्च नेष्यते । तत्र पूर्वाभद्रादीनां षण्णामन्धत्वश्रमात् ।

पूर्वाभद्राऽश्विकाऽऽदित्यमखाऽर्कैन्द्राग्निभात् क्रमात् ।
षट्षडर्कादिवारेऽन्धाः शुभकर्मविनाशनाः ।

इति । तच्च त्रिघ्नगतवारसंख्यास्तिस्त्रस्तारा: भचक्रादौ विहाय तद्-ग्रगतरोहिणीमारभ्य काणादिगणनया सेत्स्यन्तीति ।

अन्धादिदोषो राशीनामप्यत्रिणा—

मेषोक्षसिंहा नक्तान्धाः दिवान्धास्त्रीयुगेन्दुभाः ।
कुम्भान्त्यौ बधिरौ सन्ध्योः पङ्गू प्रातस्तुलाऽळिनौ ।
सायाह्नेऽश्विमृगौ तेषु शुभं विद्यां गातिं त्यजेत् ।

इति । विवाहेऽन्धादिराशीनां फलमन्यत्रोक्तम्—

अन्धे वन्ध्या भवेन्नारी बधिरे विधवा स्मृता ।
पंगुभे दुर्भगा नारी लग्नदोषाःप्रकीर्तिताः ॥

भानां मृतादिदोषोऽपि तेनोक्तः—

अर्कस्थमुक्तप्राप्यर्क्षं मृतं सप्तार्धजीवनाः ।
पार्श्वयोर्मृतमेकैकं पूर्णप्राणमथाष्टकम् ।
सस्यारम्भे च विष्कम्भे द्रुभेदे जलताडने ।
जलप्रवेशे कूपाद्यानिधाने पूरणे गतौ ।
पूर्णप्राणं शुभं मध्यमर्धप्राणं मृतं त्यजेत् ।

इति । उष्णाशिखामाह—

अश्विन्यादिषु भेष्वजाळिमकरप्राप्तांशकान्ते क्रमादंशार्धस्मरबाणरन्ध्रघटिकास्तद्वद्विशाखादिषु । मेषांशस्य मुखेऽष्ट कोर्पिमृगयोरंशावसानेऽष्टद्-ङ्नाडीरुष्णशिखाऽऽह्वयाः परिहरेत् सर्वेषु कार्येष्वपि ॥ ३७ ॥

भानां नवांशकल्पनया प्राप्तमेषाळिमकराणां संबन्धिनो येंऽशकाः त्रित्रिनक्षत्रात्मकर्क्षसमुदायानां नवानामाद्यमध्यान्त्यभेषु प्रथ-

मचतुर्थद्वितीयपादा ये सन्ति तेषामन्ते क्रमात्—मेषांशान्तेऽ-शार्ध—सार्धसप्तघटिकाः, वृश्चिकांशान्ते स्मरबाणाः—पञ्च, मकरांशान्ते रन्ध्राणि—नव नाड्यः, उष्णशिखाऽऽख्याः अश्विन्यादिपञ्चदशभेषु भवन्ति । विशाखादिद्वादशभेषु; अथ मेषांशादावष्ट, कोर्प्यंशान्तेऽष्ट, मकरांशस्य चान्त्ये दश नाडिका उष्णशिखाऽऽख्या भवन्ति । तास्सर्वेषु शुभकार्येष्वविशेषेण त्यजेत् ।

उक्तं च—

अंशार्धबास्विष्वहिरन्ध्रपङ्क्ति-
नाडीस्त्यजेदुष्णशिखाः क्रमेण ।
भौमारसौराणशराणवेषु
सर्वत्र विद्यात् वसुवर्ज्यमन्त्यम् ॥

इति । गण्डदोषमाह—

ऋक्षात्सूर्यात्मजाक्रान्ताद्विंशं गण्डं प्रचक्षते ।
द्विचत्वारिंशदित्युक्ताः दोषास्त्याज्याश्शुभेष्वमी ॥

शनैश्चराक्रान्ताद्विंशं नक्षत्रं गण्डं नाम वदन्ति, इत्युक्ता अमी द्विचत्वारिंशद्दोषाः शुभेषु कर्मस्वविशेषेण सर्वेषु त्याज्या भवन्ति । सामान्याभिधानात् एषां प्राधान्येनेयत्ता निर्देशः ।

एवं सामान्यदोषानभिधायाथ कर्तृकर्मविशेषेण कांश्चिद्दोषानाह—

कर्तृजन्मादिकास्तारकाः कीर्तिता
जन्मसंपद्विपत्क्षेमकृत्प्रत्यरः ।
साधकोऽथो वधो मैत्रमन्यत्परं मैत्र-
मित्येवमन्याः पुनश्च क्रमात् ॥ ३१ ॥

कर्तुः पुरुषस्य योषितोऽन्यस्य वा जन्मर्क्षाद्यास्तारकाः क्रमात् जन्मादिसंज्ञास्स्युः। प्रादुर्भावकाले यत्र नक्षत्रे चन्द्रास्तिष्ठति तदृक्षं जन्मर्क्षं, तस्माद्दशमं कर्मर्क्षं, एकोनविंशमाधानर्क्षं, एतानि त्रीणि जन्मसंज्ञानि।

तथा च भरद्वाजः—

गर्भस्थोद्व (?) नक्षत्राद्दशमे तु भे।
तस्मात्तद्दशमे वा तत्सम्मितं जन्मसंज्ञितम्।
एकोनविंशं नक्षत्रं गर्भाधानमिति स्मृतम्।

इति। तेभ्यो द्वितीयादीनि संपदादिनक्षत्राणि, तथा च—

जन्मसंपद्विपत् क्षेमप्रत्यरस्साधको वधः।
मैत्रं परममैत्रं च जन्म चेति पुनःपुनः॥ इति।

जन्मविपत्प्रत्यरवधजन्माष्टमराशितारकास्त्याज्याः। साष्टमगृहाः शुभेषु त्यजन्ति षष्ठयौ चान्ये॥ ४०॥

शुभकर्मसु त्रिजन्मानि—विपत्प्रत्यरवधर्क्षाणि प्रथमजन्मर्क्षादष्टमराशेः संबन्धिन्यस्तारकाश्च जन्मविलग्नाभ्यामष्टमराशिना सह त्याज्यास्स्युः।

आत्रिः—

कर्तुश्चन्द्राष्टवैनाशविपदः प्रत्यरं वधं।
जन्मान्याद्यस्य पूर्वर्क्षं सर्वकर्मसु वर्जयेत्।

इति। चकारोऽनुक्तसमुच्चयार्थः। तेन सप्तविंशं नक्षत्रं कैश्चित् त्यज्यते।

तथा च विधिरत्ने—

त्यजेदत्र त्रिजन्मानि प्रत्यरं वधसंज्ञितम् ।
चन्द्राष्टमविनाशर्क्षं सप्तविंशतिभं तथा ।
अन्येषु शुभकार्येषु विपद्दा साहितानि तु ।
वर्ज्यान्यन्यानि शेषाणि शुभदानि शुभेषु च ॥

इति । भरद्वाजेन तु जन्मादीनामन्वर्थाभिधानेन तत्फलं दर्शितम्—

नरस्य जन्मनक्षत्रे संप्राप्ते तु तदा बुधैः ।
जन्म संचिन्त्य वक्तव्यं देहस्थस्य यथाविधि ।
व्यापदं कुरुते यस्मात् विपत्तादिति संज्ञितम् ।
कार्याणां प्रतिषेधत्वात् प्रत्यरं चेति चोच्यते ।
निधनं हि भवेद्यस्मात् सततं वधसंज्ञितम् ।
तस्मादेतानि यत्नेन वर्जयेन्नैव योजयेत् ।
संपत्करेण यत्कर्म सर्वास्तत्र हि संपदः ।
क्षेमेण तु कृतं कर्म क्षेममारोग्यमावहेत् ।
साधके साधयेदर्थानश्रमेणाचिरादपि ।
मैत्रे मित्रसमं प्रीतिं कुर्यात्कार्ये फलोदयम् ।
मैत्रं परममासाद्य यत्कार्यं कुरुते नरः ।
तत्कार्यं सुकरं तस्य सिध्यते नात्र संशयः ॥

इति । अष्टमचन्द्रग्रहणमुपलक्षणमानिष्टस्थाननिविष्टानां शिष्टानां ग्रहाणामिति केचित् ।

तथाचात्रिः—

सर्वान् लग्नान्त्यरन्ध्रस्थान् वर्जयेत्कर्तृलग्नयोः ।
विशेषात्तूच्चम्बुखेषु ज्ञं त्यजेत् षड्भ्रातृकं गुरुम् ।
स्त्रीधनान्त्ये कुजं कामे भृगुं रन्ध्रे विधुं तथा ।

इति । नैतदाचार्यस्याभिमतम् । यस्मादसावष्टमराशितारांणां त्याज्यत्वमभिधत्ते नाष्टमचन्द्रस्य । तथा चन्द्रग्रहणमुपलक्षणं स्यान्न ताराग्रहणमिति ।

तथा हि—सर्वकार्येषु चन्द्रबलमेवावश्यं ग्राह्यं । तथाऽऽह नारदः—

सर्वत्र प्रथमं लग्ने कर्तुश्चन्द्रबलं ततः ।
कल्प्यं यदीन्दौ बलिनि सत्यन्ये बलिनो ग्रहाः ।

इति । किञ्च चन्द्रबलं सर्वत्र प्रधानं । तदन्यबलं क्वचिदेव । तथा च रह्वः—

गुरुर्विवाहे गमने च शुक्रो
ज्ञाने बुधो दीक्षणके च सौरिः ।
रणेषु भौमो नृपदर्शनेऽर्कः
सर्वेषु कार्येषु शशी बलाढ्यः ॥

इति । ननु चन्द्रबलस्य प्राधान्ये तदन्यबलानामौपसर्जन्यमस्त्विति, तच्च परस्तात्प्रतिपिपादयिषितमितीह नोपलक्षितम् । अन्ये जन्मराशेः षष्ठव्ययौ च त्यजन्ति ।

तथा भरद्वाजः—

ओजा श्श्रेष्ठतमास्सर्वे नेष्टाप्षष्ठान्त्यनैधनाः ।
शेषाश्च मध्यमाः प्रोक्ताः राशयस्सर्वकर्मसु ।

इति । केचित् जन्मलग्ने च त्याज्ये प्राहुः ।

तथाच नारदः—

जन्मराश्युद्गमेनैव जन्मलग्नोदयेऽशुभं ।
तयोरुपचयस्थानं यदि लग्नगतं शुभम् ।

इति। अष्टमराश्यंशोऽपि त्याज्य इत्यन्ये। तथा विवाहप्रकरणे स एवाऽऽह—

दम्पत्योरष्टमं लग्नं राशिर्वा यदि लग्नगः।
अर्थहानिस्तयोर्यस्मात् तदंशं स्वामिनं त्यजेत्।

इति। एषां व्यवस्था दर्शिता सर्वसिन्धौ—

पापेशोऽष्टमराश्यंशो वर्ज्यस्तद्वद्दृषांशकः।
जन्मलग्ने शुभे क्षौरे मध्ये वर्ज्योऽष्टमस्तयोः।

इति। वैनाशिकमाह—

अष्टाशीतितमोंऽशो यस्मिन् जन्मादिगणनया भवति। वैनाशिकं तदृक्षं त्यजन्ति केचित् तमेवांशम्॥ ४१॥

यस्मिन्नंशे जन्म तस्मादारभ्य तदादिगणनया अष्टाशीतितमो नवांशको यस्मिन्नक्षत्रे द्वाविंशे त्रयोविंशे वा भवति तन्नक्षत्रं वैनाशिकं—विनाशकारि।

तथा च भरद्वाजः—

द्वाविंशे वा त्रयोविंशे त्वष्टाशीत्यंशको भवेत्।
वैनाशिकं तु तज्ज्ञेयं नक्षत्रमिति तच्छ्रुतिः।
विनाशं कुरुते यस्मात् तस्माद्वैनाशिकं भवेत्।

इति। तद्भं शुभेषु त्यजन्ति—
केचित् तमष्टाशीतितममंशमेव त्यजन्ति।

तथा च गुरुः—

वैनाशिकाऽऽख्ये नक्षत्रेऽप्यष्टाशीत्यंशकं विना।

शिष्टांशाः शुभदास्सर्वे जन्मनीन्दुगतांशतः ।

इति । अत्र द्वाविंशस्य त्रयोविंशस्य वैनाशिकस्य वैनाशिकत्वानवधारणादनभिधानम् । तदवधारणस्यांशनिबन्धनत्वात्तदभिधानम् ।

किञ्चाऽऽचार्यस्येदमत्राभिमतम्—अपवादाभावे नक्षत्रमेव त्याज्यं, सत्यपवादेंऽश एवेति । अन्ये मानसादीनामुपलक्षणमिदमित्याहुः ।

तथा च नारदः—

जन्मर्क्षाद्दशमं कर्म सङ्घातर्क्षं तु षोडशम् ।
अष्टादशं सामुदायं त्रयोविंशं विनाशभं ।
मानसं पञ्चविंशर्क्षं तस्मादेषु शुभं त्यजेत् ।

इति । आचार्येणोपसर्जनानीति नोक्तानि ।

एकार्गळमाह—

संप्राप्ते परिघादियोगनवके पैत्राहिपुष्यादिति-त्वाष्ट्रेभ्योऽश्विभतस्तुषारकिरणान्मूलाच्च मैत्रादपि। प्राक् पश्चाच्च यथाक्रमं विगणिते तारागणे संख्यया चन्द्रार्काश्रिततारके यदि समे दोषोऽयमेकार्गळः ॥ ४२ ॥

परिघादिषु निन्द्यतयाऽभिहितेषु नित्ययोगेषु नवस्वेकस्मिन् प्राप्ते; मखादिस्वोक्तभादारभ्य प्राक् पश्चात् क्रमोत्क्रमाभ्यां गणिते सति भगणे चन्द्रार्काक्रान्तनक्षत्रे यदि समसंख्ये स्तः तदैकार्गळो नाम दोषस्स्यात् । प्राचीमृज्वीमेकां रेखां तद्भेदिनीस्त्रयोदश तिरश्चीरालिख्य ऋजुरेखाग्रे मखादिभानि विन्यस्य तदन्यानि षड्विंशतिभानि क्रमेण तेषु चन्द्रार्कौ स्वाक्रान्तर्क्षयोर्विन्यसेत् । तत्रार्केन्दू यद्येकरेखारूढौ स्तः तदैकार्गळो दोषः ।

तथा च श्रीपतिः—

एकामूर्ध्वगतां त्रयोदश तथा तिर्यग्गताः स्थापये-
द्रेखाश्चक्रमिदं बुधैरभिहितं खार्जूरिकं तत्र तु ।
व्याघातादिषु मूर्ध्नि भं च कथितं तत्रैकरेखास्थयो-
स्सूर्याचन्द्रमसोर्मिथो निगदितो दृक्पात एकार्गळः ।
व्याघातशूलपरिघव्यतिपातपूर्व-
गण्डातिगण्डकुलिशेषु सवैधृतेषु ।
आदित्यचन्द्रपितृसर्पभदस्रमूल-
मैत्राख्यतिष्यसुरवर्धकिभानि मूर्ध्नि ।
दिनकरहिमरश्म्योर्दृष्टिसंपातजन्मा
भवति विकृतमूर्तिः कोऽपि रौद्रो मनुष्यः ।
पतति भुवनमध्ये मङ्गलानां विनष्टयै
ज्वलनकपिलदृष्टया निर्दहन्त्या जगन्ति ॥

इति । शून्यान्याह—

कुम्भान्त्यवृषवीणाजस्त्रीकीटवणिगश्विनः ।
कर्की मृगमृगेन्द्रौ च चैत्रादौ शून्यराशयः ॥४३॥

चैत्रादिमासेषु कुम्भादयश्शून्या भवन्ति । स्त्री—कन्या, वणिक्—तुला, अश्वी—धनुः, मृगेन्द्रः—सिंहः, ।

अत्र गुरुः—

चैत्रे कुम्भस्तदा वर्ज्यो वैशाखे मत्स्य एव च ।
ज्येष्ठे वृषो यमश्शुच्यां मेषं नभसि वर्जयेत् ।
नभस्ये कन्यका वर्ज्या वृषे वृश्चिक एव च ।
ऊर्जे तु तौलिको वर्ज्यस्सह चापं तथा विषम् ।

सहस्ये कर्कटो वर्ज्यो नक्रं तपसि वर्जयेत् ।
तपस्ये तु हरिर्वर्ज्यो राशयो विषवत् शुभे ।
अतिशून्यकरा ज्ञेया मासिमास्यखिले त्वमी ।
एषु यच्छुभदं कर्म कृतं तत्सर्वनाशनम् ॥

काद्ये विश्वार्यचित्रापवनभमदितिं भाग्यवस्वृक्षके वार्विश्वर्क्षे वारुणान्त्ये शरकृतिमितिभं सोमपित्र्याग्निपुष्याः । [1]षड्विंशैन्द्राग्नमित्रा रवितुरगशिवा विष्णुमूले यमेन्दू शून्यास्ताराः क्रमेण त्यजतु पदमिता मास्सु चैत्रादिकेषु ॥४४॥

इति ।

कः—ब्रह्मा । आर्यो—बृहस्पतिः । वाः—वारि । शरकृतिः—पञ्चविंशतिः । चैत्रादिषु मासेषु काद्य इत्यादिषु क्रमेण पदमिताः सुबन्तैकैकपरिच्छिन्ना एकद्वाः त्रिचतस्रो वा ताराः शून्यास्त्यजतु शुभकर्मसु त्यजेदित्यर्थः । विध्यर्थे लोट् ।

एतदुक्तं भवति गुरुणा—

रोहिणी चाश्विनी चैत्रे शून्यभे परिकीर्तिते ।
वैशाखे त्वाष्ट्रवायव्यवैश्वातिष्यास्तु शून्यभाः ।
मासि ज्येष्ठे तथाऽऽदित्यमाषाढे भगवासवौ ।
श्रावणे वैश्वतत्पूर्वनभस्ये पौष्णवारुणे ।
अजैकपादिषे नेष्टं पूषेन्द्वग्निमखाः परे ।
सहे विशाखा मैत्रं च भाद्रपादं तथोत्तरम् ।

[1] बुध्न्यर्क्षैन्द्राग्नमित्राः प्रथमरवीति ॥ पा ॥

सहस्येऽश्विकरार्द्रास्स्युर्हरिर्मूले तपस्यसत् ।
तपस्ये भरणी शक्रे शून्यभान्याहुरग्रजाः ।
शून्यभेषु तु यत्कर्म तत्सर्वं नाशतां व्रजेत् ।
कर्त्रा सह कुलेनैव धनेन महताऽपि च ।

इति । रविभुजगशिवानिति केषांचित्पाठः

तथा चात्रिः—

शून्यास्तिष्येऽहिरुद्रार्काः कर्कटं सितसप्तमी ॥

इति । केचिन्मेषादिसौरमासेषु शून्यान्येतान्याहुः ।

तथा च विधिरत्ने—

चैत्रे वाजिप्रजेशौ वृषभयुजि रवौ जीवविश्वेन्दुवायू-
नदित्यं वै तृतीये भगमपि वसुभं तच्चतुर्थे च शून्यं ।

श्रावण्यां चाऽऽप्यमूले युवतियुजि भगे वारुणं पौष्णमाहु-
श्श्लेषे चाजैकपादं शशिगुरुपितृखान्यष्टमे शून्यमग्निम् ।

ऐन्द्राग्नमैत्रे नवमेऽप्युपान्त्यं
सार्पं च हस्तं दशमे सरौद्रं ।
मूलं च विष्णुं मघमासि शून्यम्
ज्येष्ठां च याम्यं त्यज फाल्गुने च ॥

इति । 'इह श्रावण्यां चाऽऽप्यमूले इति' । विधिरत्नेनोक्तमनादरणीयम् । प्राक्तनैस्तथाऽनभिधानात् ।

भरद्वाजश्च—

आषाढसंज्ञे नभसि त्यजेच्च
नभस्यमासे वरुणं च पौष्णम् ॥

इति । शून्यतिथीराह—

षड्बाणार्ककुलाद्रिपङ्क्त्युदधिदिग्धात्रीमहेशा-चलक्षोणीलोचनपावकाष्टनवसंख्यातेषु मासेष्व-पि । शून्याख्याः प्रथमादिकाश्च तिथयः पक्षे सिते कीर्तिताः त्याज्याः पञ्चदश क्रमेण खलु ताः कृष्णे द्वितीयादयः ॥ ४५ ॥

कुलाद्रयः—सप्त, पङ्क्तिः—दश, उदधयः—चत्वारः, षडादिप्रोक्तसंख्यातेषु मासेष्वपि शून्याख्यासम्मितेषु मासेषु भाद्रपदादिषु पञ्चदशसु शुक्ले क्रमेण प्रतिपदाद्याः पूर्णिमान्ताः पञ्चदश, कृष्णे तु द्वितीयाद्याः दर्शान्ताश्चतुर्दश, कृष्णप्रतिपदा सह पञ्चदश तिथयः शून्याख्याः शुभकर्मसु त्याज्याः । एतदुक्तं भवति गुरुवचनेन—

प्रथमा च द्वितीया च सिते कृष्णे नभस्यके
द्वितीया च तृतीया च श्रावणे सितकृष्णयोः ।
फाल्गुने सितकृष्णाख्ये तृतीया च चतुर्थ्यपि
इषे सितेतरे पक्षे चतुर्थी पञ्चमी क्रमात् ॥
सितेतरे तपस्ये तु पञ्चमी पष्ठचसत्क्रमात्
शुचौ सितेतरे पक्षे षष्ठी सप्तम्यसत्प्रदे ।
पौषे पूर्वे च कृष्णे च सप्तम्यष्टम्यसत्प्रदे ।
चैत्रे पक्षे सिते कृष्णे अष्टमी नवमी न सत्
माघे सनवमी पक्षे सितेऽथ दशमी परे
श्वेते कृष्णेऽप्याश्वयुजे दशम्येकादशी न सत् ।
मधौ पूर्वे परे पक्षे न सद्वेकादशी परा

माधवे सितकृष्णाख्ये द्वादशी च त्रयोदशी ।
त्रयोदशी सिते ज्येष्ठे कृष्णे चासच्चतुर्दशी ।
ऊर्जे चतुर्दशी श्वेते कृष्णे पञ्चदशी न सत्
पौर्णमासी कुहूश्चैव सहे द्वे प्रतिपन्न सत् ।
तिथयो मासशून्याख्याः शुभकर्मविनाशनाः
एषु पित्र्याणि कुर्वीत कर्माण्यात्महितेच्छया ॥ इति ।

षड्बाणार्ककुलाद्रिपङ्क्त्युदधिदिक्क्षोणीति केषांचित्पाठः । सोऽनादरणीयः । यस्मादत्रिः—

शून्यं यमेन्द्रौ सिंहोऽन्त्ये तृतीया पञ्चमी सिते ॥

इति । चकारोऽनुक्तसमुच्चयार्थः । तथाहि—मेषचापादिमासेषु द्वन्द्वेषु केचिद्द्वितीयादियुग्मतिथीनां दग्धत्वमाहुः । तथाच रत्नः—

झषधनुषोर्वृषघटयोः कर्कजयोर्मिथुनकन्ययोरर्के ।
हरिकोप्योर्मृगवणिजोर्दग्धाश्चैकान्तरा द्वितीयाद्याः ॥

इति । केचित् पञ्चम्यादिपूर्णात्रयवर्जितानां प्रतिपदादिद्वादशतिथीनां तत्पूर्णात्रयपादानां द्वादशानां च क्रमेण मेषादिराशिषु क्रूराक्रान्तेषु दग्धत्वमाहुः । तथा स एव—

मेषाद्यानामाद्याश्चत्वारः पञ्चमी चतुर्णां च
परतः परतोऽन्येषां न शुभा स क्रूरराशितिथिः ॥

इति । आश्वयुजादिषु शुक्लसप्तम्यादयो मन्वादितिथय इति । कार्तिकादिषु युगादितिथय इति कैश्चिन्निन्दिताः । तथाच श्रीपतिः—

आश्वयुजशुक्लनवमी द्वादश्यूर्जे मधौ तृतीया च ।
भाद्रपदेऽपि तृतीया श्रावणमासे त्वमावास्या ॥

एकादशी च पौषे शुचिसितदशमी च सप्तमी माघे ।
बहुळाष्टमी नभस्येऽप्याषाढे कार्तिके पूर्णा ॥
फाल्गुनासितपञ्चदशी चैत्री ज्येष्ठस्य पौर्णमासी च ।
मन्वन्तराद्य इमाश्चतुर्दशोक्ता बुधैः पुण्याः ॥

इति । अत्रिः—

कार्तिके नवमी शुक्ला तृतीया माधवेऽमला ।
माघे दर्शो नभस्येऽन्त्या त्रयोदश्योर्युगादयः
आसु श्राद्धं शुभं दत्तं स्नातमक्षयमेति च ॥

इति । शून्यमासमाह—

पौषो मासश्शून्य इति कैश्चित् देशेषु केषुचित्।
वर्ज्यते शुभकार्येषु विवाहेषु विशेषतः ॥ १६ ॥

पौषो मास इति धनुस्स्थेऽर्के शुक्लप्रतिपदमारभ्य मकरस्थेऽर्के दर्शावसानश्चान्द्रो मास इत्युच्यते । तथाच भरद्वाजः—

मीनगे स्यात् सिनीवाली सूर्ये वै मेषगे कुहूः ।
स चैत्र इति विज्ञेयो मासो वर्षादिसंभवः ।
वैशाखो मेषवृषयोरेवं मासाः क्रमेण तु ।
राश्यो राश्योस्तु विज्ञेया भास्करस्य प्रवर्तनात् ॥

इति । अन्ये त्वाहुः—

यस्मिन् मासे पौर्णमासी पुष्ययुक्ता स पौष इति ।

तथाचामरः—

पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा ।
नाम्ना स पौषो माघाद्यास्त्वेवमेकादशापरे ॥ इति ।

केषु चित्—कर्णाटककोसलादिषु देशेषु पौषमासश्शून्य इति शुभकार्येषु विवाहाद्युपनयनादिषु कैश्चिद्वर्ज्यते । कैश्चित् पौषो न शून्य इत्युपनयनादिषु गृह्यते । विवाहादिषु ब्राह्मादिषु विशेषतो नियमात् बहुभिर्विवर्ज्यते । अन्येषु शुभकार्येषु कैश्चिद्देशाचारेण वर्ज्यते कैश्चिन्नेत्यनियमः । तस्मान्नायं सर्वत्र शून्य इष्यते ॥

अथ दग्धादिभान्याह—

ग्रहैरनिन्द्विन्दुजभार्गवैर्य-
न्मुक्तं च युक्तं च यियासितं च ।
क्रमेण दग्धं ज्वलितं तदृक्षं
धूमायमानं च शुभेषु जह्यात् ॥ ४७ ॥

ग्रहैः चन्द्रबुधशुक्रेभ्योऽन्यैः यन्नक्षत्रं मुक्तं भुक्तोज्झितं तद्दग्धं, यद्युक्तं भुज्यमानं तत् ज्वलितं, यत् यियासितं तद्धूमायमानमिति त्रीणि नक्षत्राणि शुभेषु वर्जयेत् । अत्र भरद्वाजः—

ग्रहैर्युक्तं च मुक्तं च काङ्क्षितं चेति भत्रयम् ।
गर्हितं तु तदा ज्ञेयं सर्वारम्भेषु नित्यशः ॥

इति । इदं सामान्यम्, विशेषो ब्रह्मयामळ उक्तः—

नक्षत्रं क्रूरसंयुक्तं विद्यादालिङ्गितं प्रिये
क्रूरमुक्तं भवेद्दग्धं तदग्रस्थं विधूमितम् ।
दग्धेन मरणं विद्यात् ज्वलितेन कुलक्षयः
धूमिते भङ्गमायाति तस्मात्त्रीणि त्यजेत् सदा ॥
विवाहे विधवात्वं च गमने न निवर्तते

कृषयो निष्फलास्सर्वा वापितं न प्ररोहति ।

यत्किञ्चित्क्रियते कर्म तत्सर्वं निष्फलं भवेत् ॥ इति ।

स्यादेतत्—यदि क्रूरमुक्तमेव दग्धं; तत्कथं जीवत्यक्तस्य दग्धत्वं, अथ शुभमुक्तमपि, तत्कथं शुक्रमुक्तस्य न स्यादिति, सत्यं, ज्ञापकात्सिद्धमित्यभिदध्मः । ज्ञापकं च परस्तादपवादकथनम् । नन्वेवं क्रूरजीवैरिति सुवचं, कुतो ग्रहैरनिन्द्विन्दुजभार्गवैरिति, अत्र ब्रूमः—

बुधस्य पापयोगात् पापत्वे सिद्धे तन्मुक्तस्य दग्धत्वं मा भूदिति । अथापि व्यर्थमनिन्दुग्रहणं, सर्वेषां दग्धत्वादिप्रसङ्गात् । यतस्ताराणामिन्दुसंयोगेनैव व्यवहारप्रसिद्धिः ॥

यथाऽऽह भरद्वाजः—

यद्यन्नक्षत्रमासाद्य शशी यावत्तु तिष्ठति

तावत्तन्नामसंयुक्तं नक्षत्रमिति चक्षते ॥

इति । नैतत्कृष्णे, क्षीणेन्दुसंयोगात् भानां दग्धत्वादि समस्त्विति । अस्तु काममिष्टमेव संपद्यते, यतश्चन्द्रक्षये सर्वकर्माणि वर्ज्यानि । उक्तं हि भरद्वाजेन—

यथा चन्द्रमसो वृद्धिः शुक्लपक्षे कृतं तथा ।

कृष्णपक्षे कृतं तद्वत् क्षीयते न च वर्धते ॥

इति । नायं नियमः, कृष्णेऽपि शुभक्रियाणां विधानात् । तथाहि भरद्वाजः—

शुक्ले वा यदि वा कृष्णे कार्यास्सर्वाश्शुभाक्रियाः ।

शुभैर्बलयुतैर्दृष्टे चन्द्रे क्रूरैर्विवर्जिते ॥

इति । नन्विदं दोषभङ्गकथनं दग्धादिष्वप्यनिवार्यमिति चेत्, नायं दोषभङ्गः, शुक्लकृष्णयोरविशेषकथनात् । तस्मात् कृष्णपक्षस्य वर्ज्यत्वनिषेधायानिन्दुग्रहणमित्यनवद्यम् । ज्वालादियोगानाह—

भौमात् भूपनगाब्धितत्त्वमनवो ज्वाला गुरोर-ङ्कभं व्याधिस्सोमजतोऽष्टसङ्कृतिधृतीराहुर्महा-कण्टकम्। पातात्पञ्चममीश्वराश्च परिघं शुक्राच्च तिथ्यद्रयो द्वेषस्सूर्यसुताद्दशार्तुकृतयः खण्डस्स्मृतः पण्डितैः ॥ ४८ ॥

भौमाक्रान्तनक्षत्रात् षोडशसप्तमचतुर्थपञ्चविंशचतुर्दशानि पञ्च-र्क्षाणि ज्वालासंज्ञानि। गुरोर्नवमं व्याधिः, बुधादष्टमचतुर्विंशाष्टादशानि त्रीणि महाकण्टकसंज्ञानि। राहोः पञ्चमैकादशे परिघाख्ये। शुक्रात् पञ्चदशसप्तमे द्वे द्वेषाख्ये। शनेर्दशमषष्ठविंशानि त्रीणि खण्ड-संज्ञानि॥ अत्राऽऽहुः—

सप्तमं षोडशं भौमात् पञ्चविंशं चतुर्दशम्।
चतुर्थं च भवेज्ज्वाला द्वेषश्शुक्राच्च सप्तमम्।
पञ्चदशं शनेर्दग्धं षष्ठैकादशविंशत्यम्।
पातात्त्रयोदशं दण्डं पञ्चमैकादशं त्यजेत्।

अत्र गुरुः—

ऋक्षात्सौम्ययुताद्दष्टधृतिजैने निशाकरे
महाकण्टकनामेद दोषत्रयमनिष्टकृत्।
बृहस्पतियुताद्दक्षान्नवमोऽपि गदाऽऽह्वयः
शुक्राच्च दशमो रोगः शनेरेकादशो यमः॥
राहोस्त्रयोदशो गर्ह्यः केतोः पञ्चदशो गरः।
एषु सर्वेषु दोषेषु शुभानि परिवर्जयेत्॥

इति। मासानाह—

सौरो राशिषु सूर्यसङ्क्रमणतश्चान्द्रस्तु दर्शान्त-

को विज्ञेयस्सितपक्षपक्षतिमुखस्त्रिंशद्दिनस्सावनः। नाक्षत्रश्शशिमण्डलादिति मता मासाश्चतुर्धा क्रमादन्त्येऽहस्त्रयमाद्ययोश्चरमयोर्दिक्पञ्चनाडीस्त्यजेत् ॥ ४१ ॥

मेषादिराशिषु सूर्यस्य सङ्क्रमात् तत्तत्संज्ञः सौरो मासः। यथा—मेषेऽर्के सङ्क्रान्ते मेषो नाम इत्यादि। दर्शाभ्यान्तोऽवसानं कं शिरो यस्य स दर्शान्तिकः, शुक्लप्रतिपदादिरमावास्यावसानश्चान्द्र इत्यर्थः। त्रिंशद्दिनानि परिगणितान्यस्येति त्रिंशद्दिनः त्रिंशदहोरात्रपरिमितः सावनः। शशिमण्डलाच्चन्द्रस्य चक्रभ्रमणात् नाक्षत्रः, इति मासाश्चतुर्धा भवन्ति ॥ तथाऽऽह भरद्वाजः—

चान्द्रो नाक्षत्रिकः सौरस्सावनश्च तथैव च।
उक्ताश्चतुर्विधा मासा लोकेषु व्यावहारिकाः।
चान्द्रं तु चन्द्रार्कसमागमाभ्यां नाक्षत्रमाहुश्शशिमण्डलेन।
सौरं तु राशिं प्रति सूर्यगत्या त्रिंशद्दिनं सावनसंज्ञमार्याः ॥

इति। मासेषु बहुषु सत्स्वपि चतुर्भिरेव व्यवहार इतीह चतुर्णामभिधानम्। तथा च सूर्यसिद्धान्ते—

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम्।
सौरं च सावनं चान्द्रमार्क्षं मासानि वै नव।
चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः।

इति। चतुर्ष्वपि च द्वावेव विशिष्टौ, तथाचोक्तं—

शशिमासश्च सौरश्च द्वौ विज्ञेयौ विशेषतः।
चान्द्रेण व्यवहारोऽत्र सौरेण सह कर्मसु ॥

इति । तद्व्यवहारोऽत्रिणोक्तः—

अभिषेके तु नाक्षत्रं सावनं जननादिषु ।
पित्र्ये चान्द्रमसं शस्तं सौरं पूर्ते प्रशस्यते ॥

इति । किंच—

यात्रोद्वाहव्रतक्षौरतिथिवर्षविनिर्णयः ।
पर्ववास्तूपवासादि कृत्स्नं चान्द्रेण गृह्यते ।
सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा ।
वर्षकालावधिश्चैव सावनैरेव गृह्यते ।

गौरवेणापि क्वचिद्व्यवहारः, तथाचोक्तं—

गुरुवारेण संभूताः षष्टचब्दाः प्रभवादयः ॥

इति ॥ सङ्क्रमानाह—

अर्के स्थिरान् विशति विष्णुपदाभिधानाः
तेभ्यः परांश्च षडशीतिमुखाश्चतस्रः ।
सङ्क्रान्तयस्त्वजमृगास्यतुलाकुळीरान्
ज्ञेयाः क्रमादुदगवाग्विषुवायनाऽऽख्याः ॥ ५० ॥

स्थिरराशीन्—वृषसिंहवृश्चिककुम्भान् अर्के प्रविशति विष्णुपदाभिधानाश्चतस्रः सङ्क्रान्तयो भवन्ति । तेभ्यः परानुभयराशीन् मिथुनकन्याधनुर्मीनान् विशति षडशीतिमुखाख्याः, मेषमकरतुलाकुळीरान् विशति उदग्दक्षिणविषुवायनाख्याः, मेषतुले विशत्युत्तरदक्षिणविषवसंज्ञे, मकरकुळीरौ विशत्युत्तरदक्षिणायनसंज्ञे स्त इत्यर्थः॥
अत्र गुरुः—

स्थिराख्ये चोभयाख्ये च भानोस्संवेशनं यदा ।
तदा सङ्क्रान्तिनाम स्यात् राशौराशौ विषोपमः ॥

इति । अत्र श्रीपतिः—

हरिपदं स्थिरभे रविसङ्क्रमं
द्वितनुभे षडशीतिमुखं भवेत् ।
उदगवागयने मृगकर्किणोः
क्रियतुलाधरयोर्विषुवं स्मृतम् ॥

इति । सङ्क्रान्तिमध्यकालात्पूर्वतः परतश्च षोडश नाडिकाः पुण्यकालमाहुः ।

तथाच श्रीपतिः—

पूर्वतश्च परतश्च सङ्क्रमात्
पुण्यकालघटिकास्तु षोडश ॥

इति । केचिदन्यथाऽऽहुः, तथाच ब्रह्मगुप्तः—

मानार्धात् षष्टिगुणात् भुक्तिहृताल्लब्धनाडिकादिलब्धेन ।
राश्यान्तात् प्रागादेः पश्चादन्यत्र सङ्क्रान्तेः ॥
सङ्क्रान्तिपुण्यकालो यल्लब्धं नाडिकादि तु द्विगुणं ।
स्नानजपदानहोमादिकोऽत्र धर्मो विशिष्टफलः ॥
एवं नक्षत्रान्तात् तिथिकरणान्तात् शशिप्रमाणार्धात् ।
षष्टिगुणात् रविशशिनोर्भुक्त्यन्तरलब्धघटिकाभिः ॥

इति । गुरुस्त्वाह—

राशौराशौ तु सूर्यस्य प्रवेशसमयो नृणाम् ।
निमेषस्यायुतांशस्यात् सोऽप्यस्माभिर्न गण्यते ॥
तथाऽपि समयस्तस्य कथितो ब्रह्मणा स्वयम् ।
तस्योपान्तेऽनुपान्ते च समसप्तार्धनाडिकाः ॥

इति । एष सङ्क्रान्तिकालः कृत्स्नस्तदादिर्मध्योऽन्तो वा पुण्य इत्यत्र व्यवस्था रह्लेनोक्ता—

मध्ये विषुवति दानं विष्णुपदे दक्षिणायने चादौ ।
षडशीतिमुखेऽतीते तथोदगयने च भूरि फलम् ॥

इति । स्नानश्राद्धादिकर्मणां दिवैवोक्तत्वात् रात्रिसंक्रमे कथमित्यत्रोक्तं—

अर्धरात्रमतिक्रम्य यदा संक्रमते रविः ।
तदा द्वितीये दिवसे स्नानदानादि कारयेत् ।
यद्यर्धरात्र एव स्यात् संपूर्णे संक्रमो रवेः ।
तदा दिनद्वयं पुण्यं स्नानदानजपादिषु ॥

इति । अत्र व्यवस्था नारदेनोक्ता—

अहस्संक्रमणे कृत्स्नमहः पुण्यं प्रकीर्तितम् ।
रात्रौ संक्रमणे भानोः व्यवस्था सर्वसंक्रमे ।
सूर्यास्तमयसन्ध्यायां यदि सौम्यायनं भवेत् ।
तदहः पुण्यकालस्स्यात् परतश्चेत् परेऽहनि ।
सूर्यस्योदयसन्ध्यायां यदि याम्यायनं भवेत् ।
तदोदयाहः पुण्यं स्यात् पूर्वाहः पूर्वतो यदि ।
प्रागर्धरात्रात् पूर्वाहः शिष्टवद्विष्णुपादयोः ।
षडशीतिमुखे चैवं परतश्चेत् परेऽहनि ।

यामवशात् फलमुक्तं रह्लेन—

पूर्वाह्णे पीड्यते राजा मध्याह्ने च द्विजोत्तमाः ।
अपराह्णे तथा वैश्याः शूद्राश्चास्तमये रवेः ।
प्रदोषे तु पिशाचाश्च अर्धरात्रे तु राक्षसाः ।

अर्धरात्रे व्यतीते तु पीड्यन्ते नटनर्तकाः ।
उषःकाले तु संप्राप्ते हन्यन्ते ग्रामिणो जनाः ।
हन्यन्ते व्रतिनस्सर्वे सन्ध्याकाले न संशयः ।

इति । उदग्विषुवस्य नारदेन विशेष उक्तः—

दिवा चेन्मेषसंक्रान्तिरनर्थकलहप्रदा ।
रात्रौ सुभिक्षमतुलमुदये कलहप्रदा ।

इति । वारवशात् संक्रान्तिनामानि श्रीपतिनोक्तानि—

घोरा रवौ ध्वाङ्क्ष्यमृतद्युतौ च
संक्रान्तिरारे च महोदरी स्यात् ।
मन्दाकिनी ज्ञे च गुरौ च मन्दा
मिश्रा भृगौ राक्षसिकाऽर्कपुत्रे ॥

इति । केचित् नक्षत्रविशेषवशात् घोरादीनाहुः—

उग्रः क्षिप्रचरैर्मित्रध्रुवमिश्राख्यदारुणैः ।
ऋक्षैः संक्रान्तिरर्कस्य घोराद्या क्रमशो भवेत् ।

इति । तत्फलं चोक्तं भरद्वाजेन—

जनो नन्दति मन्दायां मन्दाकिन्यां रसक्षयः ।
ध्वाङ्क्ष्यां प्रभूतसलिलं घोरायां शस्त्रजं भयम् ॥
महोदरी च राजघ्नी राक्षसी चाप्यनिष्टकृत् ।
मिश्रा विमिश्रा फलदा सङ्क्रान्तीनां फलं स्मृतम् ॥

इति । तिथ्यर्धविशेषाच्च फलमुक्तम्—

किंस्तुघ्नकौलवचतुष्पदनागपक्षि-
ष्वेतेषु तिष्ठति सुभिक्षकृदंशुमाली ।

मातङ्गगर्दभकयोश्शयितोऽर्घहानिं
कुर्यान्निविष्ट इतरेषु समं विधत्ते ॥

इति । रल्लस्त्वाह—

नागे चतुष्पदे तैतिले च शयितस्य सङ्क्रमो भानोः ।
सङ्क्रमणमुत्थितस्य तु शकुने किंस्तुघ्नकौलवयोः ।
विष्टिबवबणिजबालवगरेषु भानोर्भवेन्निविष्टस्य ।
वृष्ट्यर्घादेरेवं क्रमशोऽनिष्टेष्टमध्यमता ॥

इति । जन्मादितारावशात् फलमुक्तं नारदेन—

सङ्क्रान्तौ ग्रहणर्क्षे वा जन्मन्युभयपार्श्वयोः ।
नेष्टं ततष्षट्सु शुभं पर्यायाच्च पुनःपुनः ।
हानिर्वृद्धिः स्थानहानिस्तत्पार्श्वभैरिभैः क्रमात् ॥

इति । सङ्क्रान्तिदोषे तत्परिहारश्लोकः ।

तिलोपरि लिखेच्चक्रं तत्त्रिकोणं त्रिशूलकम् ।
तत्र हेम विनिक्षिप्य दद्याद्दोषापनुत्तये ॥

इति । अत्र हवींषि चोक्तानि—

अन्नं च पायसं भक्ष्यमपूपं च पयो दधि ।
चित्रान्नगुडमध्वाज्यशर्करा भवतो(?) हविः ॥
तिलान् काञ्चनशूलं च नववस्त्रं च दक्षिणाम् ।
संक्रान्तिदोषसंभूतदोषनाशाय दापयेत ॥

तन्मन्त्रं चाऽऽहुः—

सर्वग्रहर्क्षतारेश सर्वेश त्वं हि भास्कर ।
संक्रान्तिशूलदोषं मे निवारय दिवाकर ॥

इति । हेमाद्रौ—

तत्र क्रूरसमायुक्ते चाशुभं जायते ध्रुवम् ।
शुभग्रहयुते शूले त्वशुभत्वं न विद्यते ॥
षट्के क्रूरसमायुक्ते सत्फलं च न विद्यते ।

इति । तत्रैव शुभचन्द्रताराबलवशात् शुभाशुभं वाच्यमित्युक्तं नारदेन—

यादृशेनेन्दुना भानोस्सङ्क्रान्तिस्तादृशं फलम् ।
ततः प्राप्नोति तद्राशौ शीतांशोस्साध्वसाधु तत् ।
ताराबलेन शीतांशुः तद्बलाद्बलवान् रविः ।
बली सङ्क्रममाणस्तद्बलात् खेटा बलान्विताः ॥

इति । इह केचिदयनांशसहितस्यैवार्कस्य राश्यन्तरसङ्क्रमात् सङ्क्रान्तिमाहुः । तथाच श्रीपतिः—

यावद्भिरंशैरयनच्युतिस्स्यात्
तद्भागकालेन दिवाकरस्य ।
च्युतिर्भवेद्विष्णुपदादिकानां
रहस्यमेतन्मुनिभिः प्रदिष्टम् ॥

इति । नन्वत्र कथमयन(चलनां)शैरर्कस्य विष्णुपदादिसङ्क्रमाणां च्युतिरभिधीयते, तत्रैव तेषां दृक्साम्यसंभवादिति चेत्, स काममस्तु,(?) को दोषः । तत्पातकालसंख्या चाप्यत्रोक्ता—

उदगयने शतदिवसा याम्ये त्वयने चतुष्षष्टिम्
मेषतुले षोडशभिः शेषा मासा दिनत्रये फलदाः ॥

इति । नारदेन यतो राशौ रवेः प्रवेशः स सङ्क्रम उच्यते । न त्वयननिवृत्त्यादिः । अयनांशैस्तु छायानयननिवृत्त्यादिस्साध्यते । उक्तंच सूर्यसिद्धान्ते—

तत्संयुक्ताद्गृहात्क्रान्तिः छायाचरदलादिकम् ।
स्फुटं दृक्तुल्यतां गच्छेद्दयने विषुवद्वये ।

इति । तस्मादसारमेतत् । यत्पुनराहुः—

आश्लेषार्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम् ॥

इति । तदौत्पातिकं, यस्मात् काश्यपः—

सार्पार्धात् दक्षिणं भानोःश्रविष्ठाद्यं तथोत्तरम् ।
कदाचिद्दासीदयनमुत्पातं नैव शास्त्रतः ।

इति ।

त्यजन्ति पूर्वं च परं च सङ्क्रमात्
दिनानि षट् विष्णुपदात्तथाऽयनात् ।
शुभक्रियायां विषुवात्परं दिनं
परं परेभ्यश्च दिनार्धमुत्सृजेत् ॥ ५१ ॥

विष्णुपदसङ्क्रमदिनादयनसङ्क्रमादिनाच्च पूर्वं च त्रीणि पश्चाच्च त्रीणि षट् तद्दिनमेकमिति सप्त दिनानि त्यजेत् ॥

तथाच गार्ग्यः—

कृत्तिकायां मखायां च वैशाखे वसुदैवते
अर्कस्योभयपार्श्वस्थं मध्ये सप्तदिनं त्यजेत् ।

इति । भरद्वाजोऽपि—

अयनान्तर्गते सूर्ये त्र्यहं(?)पूर्वमेव तु
त्र्यहं तु निवृत्ते च वर्ज्यास्स्युष्षडहास्तथा ॥

इति । विषुवसङ्क्रमदिनात्पश्चाद्दिनमेव त्यजेत् । प्राग्दिनत्रयमेव ।

अत्र गुरुः—

पूर्वेऽतीते च विषुवे वर्ज्याष्षष्टिस्तु नाडिकाः

कालोऽतिपुण्यस्तत्पूर्वं देवानां वा शुभावहः ॥

इति। ननु गुरुणा विषुवात्प्राग्दिनं वर्ज्यमुक्तं, अत्र तु त्रिदिनमिति विरुद्धं, नैतदस्ति, गुरुणाऽपि 'मासान्ते तु दिनत्रयम्' इति सामान्येनाभिधानात्। किञ्च 'कालोऽतिपुण्यस्तत्पूर्वं' इत्यभिदधता दिनत्रयं दुष्टं तत्र दिनमतिदुष्टं इति विभज्योक्तं भवति। उदग्विषुवसङ्क्रमात् पश्चादपि त्रिदिनं त्याज्यमित्याहुः, तथा च गुरुः—

पूर्वेऽतीते च पूर्वस्य दिनत्रयमशोभनम् ॥

इति। आचार्यस्याप्येतदभिमतम्, यस्मात् सौराब्दादौ त्र्यहं परिहरेदिति वक्ष्यति। अत्र केचिदेवमाहुः—विषुवात् प्राक्पश्चाच्च त्र्यहमिति। तथाच विधिरत्ने—

तुलायां च क्रिये भानोस्संवेशो विषुवं स्मृतम्।

नवत्यो नाडिका वर्ज्याः पूर्वाश्चैव तथा पराः ॥

इति। नैतत्सारं, प्रागुक्तनिरासात्। षडशीतिमुखसङ्क्रमेभ्यः पश्चाद्दिनार्धं त्यजेत्। प्राक् त्र्यहमेव।

उक्तं च विधिरत्ने—

अन्यराशिषु सङ्क्रान्तेर्भानोः पूर्वापरास्त्यजेत्।

त्रिंशत्त्रिंशत्तु नाडीश्च शूलदोषा इति स्मृताः ॥

इति। अब्दानाह—

सौरो रवेर्द्वादशभिस्तु मासै-
श्चान्द्रैस्तु तैः प्राकृतसंज्ञितोऽन्यः।

जैवस्तु सूर्याद्धिषणोदयादिः
बुधैस्त्रिधेत्थं परिकल्पितोऽब्दः ॥ ५२ ॥

द्वादशभिः सौरमासैरेकस्सौरोऽब्दः, चान्द्रमासैः प्राकृतोऽब्दः । तुशब्दः कदाचिच्चान्द्रैस्त्रयोदशभिर्वैकोऽब्दस्स्यादिति द्योतनार्थः ॥

तथाच श्रूयते—

"द्वादश मासास्संवत्सरः, त्रयोदश मासास्संवत्सरः"

इति च । स चाधिमासाऽऽगमे संभवति । सूर्यात् गुरूदयादिनमारभ्य जैवोऽब्दः । इत्थं त्रिधाऽब्दपरिकल्पना ॥ तथाच भरद्वाजः—

प्राकृताब्दो गुरोरब्दः सौराब्दास्त्रिविधास्समाः
तेषामादौ तथाऽन्ते च त्र्यहं वर्जयेच्छुभम् ।
चान्द्रैर्द्वादशभिर्मासैः प्राकृताब्दः प्रकीर्तितः ।
यदा गुरूदयो भानोर्गुरोरब्दस्तदादितः ॥

इति । जैवाब्दस्तूद्यज्जीवस्थितनक्षत्रसंज्ञस्स्यात, तथाच वराहमिहिरः—

नक्षत्रेण सहोदयमुपगच्छति येन देवपतिमन्त्री ।
तत्संज्ञो वक्तव्यो वर्षो मासः क्रमेणैव ।

इति । ते तु कार्तिकाद्याः द्वादश, ते पुनः प्रभवाद्याः षष्टिरब्दाः । तेऽपि बार्हस्पत्यमध्यमराशिभोगसंभवाः । तथा च श्रीपतिः—

इयं हि षाष्टिः परिवत्सराणां
बृहस्पतेर्मध्यमराशिभोगात् ॥

इति । सूर्यसिद्धान्ते—

द्वादशघ्ना गुरोर्याता भगणा वर्तमानकैः ।
राशिभिस्सहिताश्शुद्धाः षष्ट्या स्युर्विजयादयः ॥

इति । तदानयनमुक्तं च श्रीपतिना—

शकेन्द्रकालः पृथगाकृतिघ्नः
शशाङ्कनन्दाऽश्वियुगैस्समेतः ।
शराद्रिवस्विन्दुहृतस्सलब्धः
षष्ट्यासशेषः प्रभवादयोऽब्दाः ॥

इति ।

सप्तान्ते रविवत्सरस्य दिवसांस्तान् पञ्चपञ्चान्ययोः प्रारम्भे दिवसत्रयं परिहरेत् तेषां त्रयाणामपि । प्रान्तेऽब्दत्रितयस्य पक्षमपरे त्याज्यं विदुस्सूरयः सप्ताहान्युपरागतोऽथ नृपतिप्राणप्रयाणात्तथा ॥ ५३ ॥

सौराब्दस्यान्ते सप्त दिनानि वर्जयेत् । प्राकृतजैवयोरन्ते पञ्चपञ्चाहानि । तेषां त्रयाणामप्यब्दानामादौ त्रिदिनं त्यजेत् । अपरे अब्दत्रयस्यान्ते पञ्चदश दिनानि त्याज्यमित्याहुः । तथाचोक्तं—

घटिकाद्वयमृक्षान्ते मासान्ते तु दिनत्रयम् ।
पक्षान्ते वर्जयेत्पक्षं ग्रहणाद्दिनसप्तकम् ॥

इति । गुरुः—

एषु सर्वेषु कालेषु बहूनां दोषसंभवात् ।
विषतुल्या भवन्त्येते कालास्तेषु शुभांस्त्यजेत् ॥

इति । नन्वत्र जैवाब्दस्यान्तयोः जीवबाल्यास्तदोषाभ्यां वर्ज्यत्वे सति पुनर्वर्ज्यत्वाभिधानमनर्थकम्, न, तयोर्मासोक्तकार्येष्ववर्ज्यत्वात् । वर्षाद्यन्तदोषौ तेष्वपि वर्ज्याविति । अथ कुतः प्राकृताब्दान्ते पञ्चाहं वर्ज्यमुक्तं, यस्मात्—

पञ्चम्याः परतः कृष्णे तिथयः परिवर्जिताः ॥

इत्यनेनैवार्थसिद्धिः, नैष नियमः, चन्द्रे प्रबले कृष्णे त्रयोदश्या अपि ग्राह्यत्वात् । अत्र त्रयः कल्पाः—वर्षान्ते वर्जयेत्पक्षं इत्याद्यः । सप्तान्ते रविवत्सरस्येति द्वितीयः । त्र्यहं वर्जयेदिति तृतीयः । तेषु गुणदोषबलाबलं ज्ञात्वा चिकीर्षितकर्मगौरवं चावेक्ष्य तदनुगुणं योजयेत् । तथाच भरद्वाजः—

गुणदोषांश्च संचिन्त्य मत्वा तेषां बलाबलम् ।
योजयेच्च यथाकालं ज्ञात्वा तत्कर्मगौरवम् ॥

इति । सर्वत्रायमेव न्यायो ग्राह्यः । सूर्येन्द्वोरुपरागतः सप्ताहानि त्यजेत् । अथशब्दोऽत्र मतान्तरद्योतनार्थः । तथाच विधिरत्ने—

चन्द्रसूर्योपरागे तु त्र्यहं पूर्वं शुभं भवेत् ।
सप्ताहमशुभं पश्चात् ग्रहशूलमिति स्मृतम् ॥

इति । अन्ये त्वाहुः—प्राक् त्र्यहं पश्चात्त्र्यहं तद्दिनमेकमिति सप्ताहानीति । तदसत् । यस्मात् गुरुः—

पश्चादेवोपरागेण दोषस्स्यान्नैव पूर्वतः
गृहदाहादयो दोषा यथा स्युर्दहनात् परम् ॥

इति । इह गृहदाहादयो दहनात् प्रागप्रतिपत्तेः परमेव स्युः, उपरागस्तु ग्रहणात् प्रागपि प्रतिपत्तेः न तथेति मन्वानाः केचिद्व्यवस्थामाहुः । तथाच नारदः—

उत्पातग्रहणादूर्ध्वं सप्ताहमखिलग्रहे
नाखिले त्रिदिनं नेष्टं नेष्टं तद्धमृतुत्रयम् ॥
ग्रस्तास्ते त्रिदिनं पूर्वं पश्चात् ग्रस्तोदये तथा ।
सन्ध्यायां त्रित्रिदिवसं निश्शेषे सप्तसप्त च ।

इति । नृपतिः—स्वामी, देशाधिपतिर्वा, अस्य प्राणप्रयाणं—निर्याणं—मरणं, ततः परं तथा—सप्त दिनानि वर्ज्यानि । इह नृपतिग्रहण-मुपलक्षणं, नृपमन्त्र्यादीनां । तथाच गुरुः—

नृपो वा नृपमन्त्री वा दैवज्ञो वा महामतिः ।
पुरोहितोऽथवा विद्वान् भिषग्वा नृपसेवकः ॥
यज्वा वा वेदविद्विद्वान् यतिर्वा संयतेन्द्रियः ।
यत्र देशे मृता ग्रामे सप्ताहं वर्जयेच्छुभम् ॥

इति । नृपादिमरणनिमित्ताशौचसद्भावात् तावद्दिनानि क्रियानर्हत्वा-भिधाने गुरुज्ञातिबान्धवाद्याशौचेऽपि यावदाशौचदिनं शुभं वर्ज्य-मिति सिद्धमेव । यस्मात् यात्रायां नारदोक्तं—

उत्सवोपनयोद्वाहप्रतिष्ठाशौचसूतके ।
असमाप्तौ न कुर्वीत यात्रां मर्त्यो जिजीविषुः ॥

इति । स्मृतिश्च—

'नित्यनैमित्तिकानि निवर्तेरन्'

'इति। नन्वत्र नृपनिधननिमित्ताशौचमेकाहमेव' 'प्रेते राजनि सज्योतिः' इति स्मृतेः, कथं सप्ताहमिति, प्रजानामराजकत्वेन मङ्गलासंभवादिति ब्रूमः । श्रीदिनान्याह—

क्रमशः सितपक्षपक्षतिप्रमुखा लोचन संयुता-[1]

---

[1] संयुता तिथिः

स्तिथीः । अचलैरपहृत्य शिष्यते यदिदं श्रीदिवसादि सप्तकम् ॥ ५४ ॥

वर्तमानमासस्य शुक्लप्रातिपदादिगततिथीर्द्वाभ्यां संयोज्य सप्तभिरपहृत्य यच्छिष्यते—यावदवशिष्टं तद्वक्ष्यमाणं श्रीदिवसादि दिन सप्तकं तावत्सङ्ख्यं दिनं भवतीत्यर्थः । तत्रैकस्मिन्नवशिष्टे श्रीदिनं, द्वयोः कलिदिवसमित्यादि । अत्राऽऽहुः—

तिथिं च त्रिंशता गुण्य द्वाभ्यां च गुणयेत्ततः ।
आहृत्य पक्षसङ्ख्याभिर्धरण्या संयुतं पुनः ।
वर्तमानतिथेस्संख्यां संयुज्य गिरिभिर्हरेत् ।
गिरिलब्धफले शेषा योगाः श्रीदिवसादयः ।

इति । एतदेवाचार्येण ध्रुवमनिबन्धेनोक्तं । केचिदन्यथाऽऽहुः—युगवर्षाणि द्वादशभिर्हत्वा गतमासैः संयोज्य पुनस्त्रिंशता संगुण्य गततिथिभिः संमिश्र्य त्र्यशीत्युत्तरशतेन छित्वा अवशिष्टेषु षोडशसु श्रीदिवसः, ततो दशसु कलिदिनमित्यादि । तथाच भरद्वाजः—

दिवसाष्षोडश पूर्वं पङ्क्तिः पश्चादथैकपञ्चाशत् ।
चत्वारिंशच्चैकात्रिंशत् पञ्चैव लोकाष्ट ॥
रूपतुल्यान्युगजातांस्तान(?)तीत्य दिवसगणान् ।
शेषेषूक्तदिनान्ते श्रीदिवसाद्या भवेयुस्ते ॥

इति । एतच्चैकैकस्य कतिपयाहस्स्थायित्वात् मिथो वैषम्याच्चाचार्यस्य नाभिमतम् ॥

सप्त दिवसास्स्मृतास्श्रीकलिनन्दनकालकार्णिनामानः । जयवधधनार्णवाख्यास्तेषु च विषमाश्शुभास्समा न शुभाः ॥ ५५ ॥

अस्य भरद्वाजवाक्यं व्याख्यानं—

श्रीदिवसः कलिदिवसोनन्दनदिवसश्च कालकर्णी च ।
जयदिवसो वधदिवसो धनदिवस श्चेति सप्तैते ।

इति । सप्तमो धनार्णवदिवसः तेषु सप्तदिनेषु विषमाः कलिदिवसादयस्त्रयः कष्टाः । अत्र गुरुः—

श्रीनन्दजयाख्याश्च धनतद्दिवसेश्वराः ।
योगास्सर्वे समा ह्येते शुभदा बलिनो यदि ॥

इति । एषां शुभाशुभनक्षत्रादियोगेन फलाधिक्यं । तथाच भरद्वाजः—

दिवसे तु तथा प्राप्ते नक्षत्रे च शुभाशुभे ।
द्विगुणं तत्फलं दद्यात् तस्मात्तानुपलक्षयेत् ॥

इति । गुरुशुक्रयोरस्तादिपञ्चदोषानाह—

दृश्यौ यदाऽहनि जनैर्व्रजतो यदाऽस्त
मन्योन्यतः स्मरगतौ च यदार्यशुक्रौ ।
कर्माणि तत्र समये न शुभानि कुर्यात्
नैवारभेत शशिजेऽस्तगते च विद्याम् ॥ ५६ ॥

गुरुशुक्रौ यदा अहनि दिवा सूर्यस्याधोदयात्परमर्धास्तमयादर्वाक् जनैः पशुपादिभिर्दृश्यौ तदा काले शुभकर्माणि न कुर्यात्, तयोर्यावद्दिनानि दिवा व्योम्नि दृश्यत्वं तावद्दिनानि शुभं न कार्यमित्यर्थः ।

ननु रात्रिदृश्यानां तारादीनां दिवा दर्शनस्योत्पातत्वात् तस्य च 'विविधोत्पाताश्च तं वासरं वर्जयेत्' इति वक्ष्यमाणत्वात् कुतः पुनरिह पृथग्वचनं, उच्यते—तत्रैकं दिनमेव त्याज्यं, इह तु यावद्दर्शनं दिनानीति विशेषः । यदा च तौ सूर्यप्रत्यासत्तिवशादस्तं रात्रावप्यदर्शनं

व्रजतः; यदा चान्योन्यतः सप्तमभाग्गतौ स्तः। तस्मिन् काले शुभानि न कुर्यात्। अत्र गुरुः—

यद्वा दिवैव दृश्येते जीवशुक्रौ नभस्तले
तयोरन्यतरो वाऽपि स कालो बहुदोषदः।
ततः प्रभृति सप्ताहमेकाहं शुभनाशनम्
तयोरालोकनं यावत् शुभं तावद्विवर्जयेत्।
दिवा निदर्शनात् पश्चात् प्रत्यहं सप्तसप्त च
गुरुशुक्रौ यदा मूढं गच्छतो दोषदौ तदा।
विवाहे विधवा नारी द्विजन्मनि वटोर्मृतिः
चूडाकृते शिशोर्मृत्युः स्थापने देशनाशनं।
यदा जीवसितौ चक्रे परस्परमुदीक्षितौ
सप्तमस्थौ तदा दोषो मूढत्वादतिरिच्यते॥

इति। तथा बुधेऽस्तगते विद्यामेव नारभेत, उक्तं च विद्याप्रकरणे गुरुणा—

'शंसन्ति ज्ञेऽव्यनस्तगे'

इति। विवाहादिकं काममारभेतेत्यवधारणार्थः।

प्राक्पश्चादुदितं रवेर्भृगुसुतं बालं वदन्ति क्रमात् बाणद्वीपदिनानि वृद्धमनयोरस्ते दिनव्यत्ययात्। उद्वाहे क्रमशोऽङ्गनापुरुषयोर्हन्ता स एवं गुरुस्सर्वेषां च तयोर्द्विशशुस्थाविरता विद्वेषिणी कर्मणां॥ ५७॥

वक्रत्वान्मन्दया गत्या सूर्यविप्रकर्षवशात् प्राच्यां दिश्युदितं दृश्यत्वमापन्नं ; तथा निसर्गात् शीघ्रया गत्या प्रतीच्यां दिशि दृश्यत्वं प्राप्तं शुक्रं क्रमेण बाणद्वीपदिनानि प्राच्यामुदयदिनोदयात् परं पञ्च दिनानि प्रतीच्यामुदयदिनात्परं सप्त दिनानि बालं। तथा अनयोः प्राक्प्रतीच्योरन्ते सूर्यसन्निकर्षवशात् दृश्यत्वे सति दिनव्यत्ययात् वृद्धं वदन्ति, प्राच्यामस्तदिनोदयादर्वाक् सप्त दिनानि प्रतीच्यामस्तदिनास्तमयादर्वाक् पञ्च दिनानीत्यर्थः। ब्राह्मादावुद्वाहे स शुक्रो बालो वधूहन्ता, वृद्धो वरहन्ता, गुरुरप्येवं-शुक्रवत् बालो वृद्धश्च, तस्य तु वक्रास्तोदयाभावात् प्राच्यामेवोदयः प्रतीच्यामेवास्तम्। तत्रोदयदिनोदयात् परं पञ्चदिनानि बाल्यं, अस्तदिनास्तमयादर्वाक् पञ्चाहानि वृद्धत्वं। अत्र गुरुः—

प्राक्पश्चादुदितः शुक्रः पञ्चसप्तदिनं शिशुः।
विपरीतं तयोरस्ते वृद्धस्तद्वत् गुरोरपि॥

इति। अन्ये त्वन्यथाऽऽहुः। तथाच नारदः—

पश्चात्प्रागुदितः शुक्रो दशत्रिदिवसं शिशुः।
वृद्धः पञ्चदिनं पक्षं गुरुः पक्षं तु सर्वतः॥

इति। अन्ये च—

वृद्धश्शुक्रः पतिं हन्ति बालश्शुक्रस्तु योषितं।
एवमेवामरगुरुः विद्यारम्भे गुरुस्तथा॥

इति। बुधशुक्रयोः रात्रिसन्दर्शने शुभं कार्यं।

यथाऽऽह भरद्वाजः—

मूढस्थे तु गुरौ शुक्रे शुभकर्म न कारयेत्।
यदा सम्यक्प्रदृश्येते आरभेत हि तौ यदि॥

इति । विद्यारम्भे बुधस्यापि बालवृद्धत्वे शुक्रवत् द्रष्टव्ये ।
ननु—

नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयम् ॥

इति बुधोदये उत्पातश्श्रूयते, स कथं विद्यारम्भे शस्यत इति, उच्यते—सत्यमुत्पात एव, तथाऽपि तस्य नानिष्टकृत्त्वनियमः, किं तर्हि, सर्वत्र प्रकृत्यन्यत्वमात्रविधिरेव । तथाहि बुधोदये प्राक् वृद्धिमतां हानिः, हानिमतां वृद्धिः, सुखिनां दुःखं, दुःखिनां सुखं, तस्मात् नायमन्योत्पातसदृश इत्यदोषः ॥ ग्रहवेधमाह—

हरिणाननस्य दशमांशकत-
स्त्यजतु(त) ग्रहान् स्फुटतमानखिलान् ।
अवशिष्टमत्र शुभकर्मणि त-
द्ग्रहवेधदुष्टमिति भं विसृजेत् ॥ ५८ ॥

मकरस्य दशमांशकात् स्फुटांस्तात्कालिकानर्कादिकानष्टौ ग्रहान् विशोध्यात्र यदवशिष्टं नक्षत्रं तत् तस्य ग्रहस्य वेधेन दुष्टमिति यतस्तस्मात् तच्छुभकर्माणि विसृजेत् ।

एतदुक्तं भवति भरद्वाजवाक्येन—

स्थाप्यैकविंशं नक्षत्रं तत्तद्ग्रहगतिं त्यजेत् ।
शिष्टं तद्ग्रहवेधस्स्यात् तत्तच्चारभमादितः ॥
ग्रहवेधयुते चर्क्षे यत्कृतं तद्विनश्यति ।
क्रूराणां तु हरेत्प्राणान् सौम्यानां कर्मनाशकृत् ॥

इति । नन्विहैकविंशतिभ्यो ग्रहभुक्तनक्षत्राणि सनाडिकानि विशोध्यावशिष्टसमसङ्ख्यनक्षत्रमाश्विन्यादिकं ग्रविद्धमित्यभ्यधायि, भरद्वाजेन तु

तत्तद्ग्रहचारर्क्षादिकमुक्तमिति महद्वैषम्यम्, अत्रोच्यते, नाद्यं, मुनिमतविरुद्धत्वात् । नापि द्वितीयं, सर्वत्रैकाविंशस्य भस्यैव वेधप्रसङ्गात्, अयमत्रार्थः--मकरस्य दशमांशात् सूर्यादीन् केत्वन्तानष्टौ ग्रहान् युगपद्विशोध्य शेषे(षो) यावत्संख्यं नक्षत्रं तत्तद्ग्रहचारर्क्षात् तावत्संख्यं तत्तद्ग्रहविद्धमिति । तथाच गुरुः—

मकरे दशभागेभ्यस्सर्वग्रहगतिं त्यजेत् ।
शिष्टं तद्ग्रहवेधस्स्यात् तद्ग्रहस्थर्क्षमादितः ॥
काळरात्रोऽर्कवेधस्स्यात् कुजवेधोऽस्तरात्रकः ।
बुधवेधोऽनुरात्रस्स्यात् गुरुवेधोऽप्यरात्रकः ॥
शुक्रवेधोऽग्निरात्रस्स्यात् शनिवेधोऽन्त्यरात्रकः ।
राहुवेधो विषाख्यस्स्यात् केतुवेधोऽङ्गरात्रकः ।
ग्रहवेधास्तथा ख्यातास्सर्वैरात्रं वदन्त्यसत् ॥

इति । वास्तुनिषिद्धवेधमाह—

धातृश्रीनाथरुद्रानिलरविवरुणाः कालमित्रार्यमाम्भोबुध्नयार्यीशशक्रपूषाश्वयहिनिरृतिमखास्त्वाष्ट्रवस्वैन्दवानि । भाद्रेन्द्राग्न्यर्क्षविश्वादितिदहनभगाः पञ्चवर्गास्स्युरेषां वर्गे तद्वेधदुष्टं त्यजतु गृहविधौ (कृतौ) सग्रहा यत्र ताराः ॥ ५९ ॥

